BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL
NEW SERIES, No 1177

विधानपारिजातः ।

THE VIDHĀNA-PĀRIJĀTA



EDITED BY
PANDITA TARAPRASĀNNA VIDYĀRATNA
Professor, Sanskrit College, Calcutta

VOL. II FASCICULUS I

CALCUTTA

PRINTED BY ŚAŚIBHŪṢAṆA ARTHARATNA BHAṬṬĀCĀRYA
AT THE GIRIŚA VIDYĀRATNA PRESS,
21, GIRIŚA VIDYARATNA'S LANE,

AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET
1907

विधानपारिजातः ।



तृतीयः स्तवकः ।

(प्रथमखण्डात्परम्)

अथ विवाहे उपनयने वा उपक्रान्ते यदि कुमारस्य वधूवरयोर्वा माता रजस्वला तदा विधानमुच्यते ।

तथा च शान्तिपटले ।

विवाहे व्रतबन्धे च माता यस्य रजस्वला ।
मृत्युश्च जडता ज्ञेया क्रमात्मनुजसत्तम ।
तत्र शान्तिं प्रवक्ष्यामि सर्व्वेषा हितकारिणीम् ॥
यस्मिन् दिने समुत्पन्नं मातुर्दोषकरं रजः ।
तस्मादिनात्समारभ्य कुर्य्यान्मृत्युञ्जयं* जपम् ॥
चतुर्थेऽहनि सम्प्राप्ते पञ्चमे वा समाहितः ।

---

* मृत्युञ्जय मृत्युञ्जयमन्त्र प्रथमखण्डस्य ४०७ पृष्ठे प्रदर्शितम् ।

कुर्य्याच्छिवार्चनं विद्वान् पायसेन यथाविधि ॥
मण्डकै. पूरकैश्चापि तण्डुलै: शर्करान्वितै: ।
भक्तेन घृतयुक्तेन पक्वान्नै. पूजयेच्छिवम् ॥
अधस्तालिङ्गत: कार्य्यो पूरकैर्मोदकैस्तथा ।
भक्तस्य परिधि कृत्वा पायसेनार्चयेच्छिवम् ॥
दीपान् षोडशसंख्याकानाज्यप्रज्वलितान् शुभान् ।
अर्पयेद्देवदेवाय उपचारै: समन्वितान् ॥
प्राप्ते पूरुषसूक्तेन* मतूर्य्यो गृहमाविशेत् ।
तत्र स्थण्डिलमाधाय ध्वनद्वारयेद्बुध. ॥
अग्निमोलेति मन्त्रेण† जुहुयादयुतं सुधी ।
पायसेनैव साज्येन स्वगृह्योक्तविधानत: ॥
वर्षयेत्सप्तजिह्वस्य सप्तजिह्वा नरेश्वर ।
कराली लोहिता श्वेता मनोजवा च लोहिता ।
पीता च पद्मरागा च सुवर्णाख्या तथैव च ॥
लोहिता पूर्व्वतो ज्ञेया मनोजवा शचेर्दिशि ।
सुवर्णार्णादक्षिणे ज्ञेया पद्मरागा च नैर्ऋते ॥
श्वेता तु वारुणे भागे पीता वायोर्दिशि स्मृता ।
ऐशान्या (दिशि)दिव्या विख्याता या जिह्वा जातवेदस: ॥
सुवर्णा मध्यभागे स्यालिङ्गिद्भूचुर्मनोषिण: ।
कराली नाम सा ज्ञेया तया रक्षांसि लोपयेत् ॥

---

* प्रथमखण्डस्य १८७।१८८।१८९ पृष्ठेषु प्रदर्शितेन ।

† प्रथमखण्डस्य ११० पृष्ठे प्रदर्शितेन ।

लोहितायां पिशाचांश्च यज्ञे विद्वान् ऋतुक्रतौ । ५
महालोहितया पन्नगा दृप्तिमायाति शाश्वतीम् ॥
सुवर्णया यमो देवः पन्नगाः पद्मरागया ।
श्वेतया रुद्रदेवाश्च पीतया चेटकादयः ॥

अथ जिह्वास्तोत्रम् स्कान्दे ।

नमस्ते रसने देवि तपनस्य करालिनि ।
हुते* त्वयि समश्नन्ति राक्षसा बलदर्पिताः ॥
नमस्ते लोहिते जिह्व ज्वलनस्य सुशोभने ।
पिशाचास्तृप्तिमायान्ति हुते त्वयि हविष्यके ॥
नमस्ते रसने देवि महालोहितसञ्ज्ञके ।
हुते त्वयि समश्नन्ति यक्षगन्धर्वकिन्नराः ॥
नमस्ते वीतिहोत्रस्य सुवर्णरसने शुभे ।
त्वयि हुते यमो देवि ददाति विपुलं सुखम् ॥
पद्मरागे नमस्तुभ्यं देवपन्नगतर्पणे ।
जायते शाश्वत†ी देवि हुते त्वयि हुताशने ॥
ग्रहाणां तर्पणं देवि कुरु जिह्वे हविर्भुजः ।
हुते हविषि विप्रेण ग्रहदृप्तिर्भवेदिह ॥
चेटकाः क्षेत्रदेवश्च समस्ताः कुलदेवताः ।
पीतायां हवने जाते दृप्तिमायान्ति शाश्वतीम् ॥

---

* हुते इति आर्षं, हुतायामिति पाठो युक्तः, रसनाशब्दस्य स्त्रीलिङ्गत्वात् ।

† सर्वत्रेति शेषः ।

इति जिह्वास्तुतिं कृत्वा समाप्य विधिवद्धुतिम् ।
अभिषेकं ततः कुर्यादुदक्याः सूतुना सह ॥
ततस्तु दक्षिणां दत्त्वा आचार्याय मनोषिणे ।
अन्येभ्यो ब्राह्मणेभ्यश्च यथाशक्ति क्षमापयेत् ॥
कस्मैचिन्मन्त्रकं दद्यात् सोपधानं सदक्षिणम् ।
प्रेतराजं समुद्दिश्य मन्त्रेणानेन सत्तम ॥

मन्त्रो यथा ।

नमस्ते धर्मराजाय देवदेवाय ते नमः ।
मन्त्रकस्यास्य दानेन प्रीतो भव मम प्रभो ॥
यस्मिन् वस्त्रे रजो दृष्टं तद्वासस्तु परित्यजेत् ।
अपरं वस्त्रमादाय ब्राह्मणान् भोजयेत्ततः ॥
एवङ्कृते विधानेऽस्मिन् विघ्ना नश्यन्ति तत्क्षणात् ।
नन्दन्ते सुखसन्तानैः सह माता निजे गृहे ।
अक्षय्यैतद्विवाहो यः स लभेदुःखमेव च ॥

इति विधानमालाया विवाहे रजोदोषशान्तिविधानम् ।

संग्रहे तु प्रकारान्तरमुक्तं यथा ।

प्राप्तमभ्युदयाहं पुत्रसंस्कारकर्मणि ।
पत्नी रजस्वला चेत्स्यान्न कुर्यात्तत्पिता तदा ॥
अन्यमे समुहूर्त्तस्य रजोदोषे त्वुपस्थिते ।
स्त्रियं सम्पूज्य विधिवत्ततो मङ्गलमाचरेत् ॥

षोडशादावपि एवमेव ज्ञेयम् । सङ्कटे तु हरदत्तेना एवमेवोक्तम् ।

अथ विधिवत्कन्यावरणमारभ्य चिरात्रादिव्रतसमाप्तिपर्य्यन्तं मध्यवर्त्तिनि काले अशौचप्राप्तौ तदपोह्य सद्यःशौचमाह चन्द्रिकाकारः ।

तत्र याज्ञवल्क्यः ।

ऋत्विजां दीक्षितानाञ्च यज्ञियं कर्म्म कुर्व्वताम् ।
सत्रिव्रतिब्रह्मचारिदाढब्रह्मविदां तथा ॥
दाने वि(हारे)वाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥ इति ।

ऋत्विजामिति ।

अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ।
यः करोति हुतो यस्य स तस्यर्त्विगिहोच्यते ॥

इति मनूक्तवरणसंस्कारसंस्कृतानां तत्प्रयोगपरि(वरण)समाप्तिपर्य्यन्तं ऋत्विजां दीर्घकालाशौचपाते(मध्ये)ऽपि सद्यःशौचं विधीयते इति सम्बन्धः । दीक्षितानामिति । दीक्षणीयेष्ट्यादिसंस्कारवतां यजमानानां दीक्षणात् प्रभृति अवभृथस्नानपर्य्यन्तं दीर्घकालाशौचमध्ये सद्यःशौचं कथ्यते ।

तदुद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे ।
स्नानं त्ववभृथे यावत्तावत्तस्य न विद्यते* ॥

इति ब्रह्मवचनात् ।

सत्रिव्रतिदाढशब्दार्थाः मनुहे दर्शिताः । तथाहि ।

---

* अशौचमिति क्वचित् ।

सत्री गृहीतनियमो यज्ञदानेष्वदीक्षितः ।
चान्द्रायणाद्यनुष्ठाता व्रती स्वब्रह्मचार्यपि ॥
श्राद्धे च कृतसङ्कल्पो व्रती भोक्ता च कीर्त्तितः ।
दाता नित्यमनादाता वानप्रस्थोऽत्र कीर्त्तितः ॥ इति ।

ब्रह्मचारिब्रह्मविदौ प्रसिद्धौ । दाने तुलापुरुषादौ, व्याधिपरिहारार्थं दाने वा । विवाहः प्रसिद्धः । यज्ञे संभृतसम्भारस्य, कालान्तरासम्भवे देशोपद्रवे महत्यामापदि च एतेष्वपि दीर्घाशौचबाधेन सद्यःशौचं विधीयते इत्यनुपङ्गः । तथाच कन्यादातुः प्रतिग्रहीतुश्च कन्यावरणप्रभृति विवाहसंस्कारनिष्पत्तिपर्य्यन्तं दीर्घकालाशौचप्राप्तावपि सद्यःशौचं द्रष्टव्यम् ।

स्मृत्यन्तरेऽपि ।

नरेन्द्रसचिव्रतिनां विवाहोपप्लवादिषु ।
सद्यःशौचं समाख्यातं तत्तत्कार्य्यं विशेषतः ॥ इति ।

तत्तत्कार्य्यं इति विशेषणाभिधानाद्देवव्रतादिकर्म्मसु आशौचं दीर्घमस्त्येव । तत्र सद्यःशौचविधानाभावात्, यावद्वचनं वाचनिकमिति न्यायाच्च ।

यत्तु पैठिनसिवचनम् ।

विवाहव्रतयज्ञेषु याचायां तीर्थकर्म्मणि ।
न तत्र सूतकं कुर्याल्लाभं यज्ञादि कारयेत् ॥

स्मार्त्तेऽपि ।

अथ देवप्रतिष्ठायां गणयागादिकर्म्मणि ।
श्राद्धे च पित्रयज्ञे च कन्यादाने च नो भवेत् ॥

तदेतदुपक्रान्तयज्ञादिकर्मविषयं द्रष्टव्यम् ।

तथाच बृहस्पतिः ।

विवाहोत्सवयज्ञेषु खन्तरा मृतसूतके ।
पूर्वसङ्कल्पितार्थे(न्ने)षु न दोषः परिकीर्त्तितः ॥

माधवीये ।

प्रारभ्याग्निविवाहस्य माता यदि रजस्वला ।
निवृत्तिस्तस्य कर्त्तव्या सहस्रश्रुतिचोदनात् ॥

ब्राह्मेऽपि ।

अङ्कुरार्पणमारभ्य ऋत्विजां वरणं तथा ।
भावके सूतके चैव दोषस्तत्र न विद्यते ॥

षट्त्रिंशन्मतेऽपि ।

विवाहोत्सवयज्ञेषु खन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यञ्च द्विजोत्तमैः ॥

परैरसगोत्रैः ।

विष्णुरपि ।

व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

आरम्भस्य तैरेवोक्तः ।

आरम्भो वरणं* यज्ञे सङ्कल्पो व्रतसत्रयोः ।

---

* वरणमिति मधुपर्कपरं, गृहीतमधुपर्कस्य यजमानस्य ऋत्विज्ञ । यत्तादशौचे पतिते न भवेदिति निर्णय इति आह्निकेः । मधुपर्कात् पूर्वन्तु भवत्येवाशौचमिति ग्रन्थिविवेक ।

अथेदानीं कन्यादाता वाग्दानानन्तर विधिवद्विवाहवेदिं कुर्य्यादिति ।

तत्कालमाह व्यासः ।

खण्डनदलनयवारक*मण्डपमट्टेदिवर्णकाद्यखिलम् ।
तत्सम्बन्धि गतागतमट्टे वैवाहिके कुर्य्यात् ॥ इति ।

तत्प्रकारमाह नारदः ।

हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रा समन्ततः ।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णा वामभागे तु (च) सद्मनि ॥
समा तथा (चैव) चतुर्दिक्षु सोपानैरतिशोभिताम् ।
प्रागुदक्प्रवणा रम्यास्तम्भहसशकादिभिः† ॥
विचित्रामङ्गितां कुम्भैर्निहितैस्तोरणाङ्कुरैः‡ ।
शृङ्गारपुष्प§निकरैर्वर्णकैः समलङ्कृताम् ॥
विप्राशीर्वचनैः पुण्यैस्त्रिभिर्दीपैर्मनोहराम् ।
वादित्रनृत्यगीताद्यैर्हृदयानन्दिनी शुभाम् ॥
एवंविधामारुरुचेन्मिश्रुनं साग्निवेदिकाम् ॥ इति ।

हस्तप्रमाणमत्र संस्कार्य्याया बध्वा ग्राह्यम्¶ । सोपानकरणं

---

* चिक्कसा इति यस्य भाषा इति गोपीनाथ ।

† हसिग्रकादिभिरित्याकरे पाठ ।

‡ विचित्रेणाङ्गितैः कुम्भैर्विविधैस्तोरणाङ्कुरैः इत्याकरे पाठ ।

§ शृङ्गारपुष्पाणि मालतीवकुलादीनि इति गोपीनाथ ।

¶ कन्याहस्तैः पञ्चभिः सप्तभिर्वा कार्य्या वेदिः कुर्य्यादष्टोत्तरा सा ।
हस्तैः पञ्चभिर्निर्मलादासभागे जायापत्योरासिषं संप्रयुक्ता ॥ इति वचनात् ।

पश्चिमभागे उपरि चतुर्दिक्षु वा अधो वा यथाचारम्। वेदा-यतुर्हस्तपरिमितत्वं सोपानव्यतिरेकेण द्रष्टव्यम्।

इति वेदिकाकरणम्।

अथ विवाहमण्डपकरणप्रकारः।

वशिष्ठः।

षोड़शारत्निकं कुर्य्यान्मण्डपं वा द्विपट्करम्*।
यद्वाष्टहस्तं रचयेच्चतुर्द्वारोपशोभितम्।
मण्डपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत्॥ इति।

तथाच यथासम्भवं षोड़शहस्तं द्वादशहस्तमष्टहस्तं वा विवाह-मण्डपं कृत्वा स्तम्भतोरणादिभिरलङ्कृत्य मध्ये चतुर्हस्तकां वेदिकां कुर्य्यादित्यर्थः।

नन्दिनी नलिनी चैव मैत्रा च यशवर्द्धनी।
आग्नेयादिक्रमात् पूज्या मध्ये ब्रह्माणमर्चयेत्॥

इति विवाहमण्डपकरणविधानम्।

गर्व्वरोरमणमण्डलवक्त्रं पुण्डरीकदलसन्निभनेत्रम्।
क्षीरसागरसुतासुकलत्रं सेनमामि मम वंश्यसुमित्रम्॥

अथेदानीं विवाहादौ कर्त्तव्यतया विहितत्वादङ्कुरार्पणविधान-मभिधीयते।

---

* द्विपट्करं द्वादशहस्तम्।

तृतीयः स्तवकः ।

गौनकः ।

अथाङ्कुरार्पणविधिं प्रवक्ष्यामि विशेषतः ।
गौनकोऽहं द्विजातीनां मङ्गलार्थमुदीरितम् ॥
नवमे सप्तमे वापि पञ्चमे दिवसेऽपि वा ।
तृतीये बीजनक्षत्रे शुभवारे शुभोदये ॥
सम्यग्गृहान्यलङ्कृत्य वितानध्वजतोरणैः ।
सह वादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् ॥
तत्र मृत्सिकताः श्लक्ष्णा गृहीत्वा पुनरागतः ।
मृन्मयेष्वथवा वैणवेषु पात्रेषु वापयेत् ॥
सुमुहूर्तेऽथ कल्याणे गोमयेनोपलिप्य च ।
सिताक्षतैः सम्प्रकीर्य्य पालिकाः स्थापयेद्द्विजः ॥
मध्ये चतुर्मुखं विद्यात् पूर्व्वे वह्निगमेव च ।
दक्षिणे तु यमं विद्यात् पश्चिमे वरुणं तथा ।
उत्तरे शशिनं विद्यात् पालिकानाञ्च देवताः ॥
वल्मीकमृत्तिकां झादं* शुष्कगोमयमेव च ।
एतानि प्रक्षिपेत्तासु पालिकासु यथाविधि ॥
दूर्व्वाशाखल्यपर्णञ्च शिरीषं बिल्वपल्लवम् ।
तासां मूलेषु विन्यस्य क्षेत्रसूत्रेण मण्डिताः ।
मध्ये ब्रह्माणमावाह्य गन्धाद्यैरर्च्चयेत् क्रमात् ॥
इन्द्रादिक्रम एवं स्यादस्त्रमन्त्र एव च ।

---

* झाद इदपदमिति तन्त्रकारैरेव १४ पृष्ठे ६ पङ्क्तौ व्याख्यातम् ।

तिष्ठन् कर्त्ता जपेन्मन्त्रं यथात् प्राङ्मुख एव च ॥
दिशां पतीन्नमस्यामि सर्व्वकामफलप्रदान् ।
कुर्व्वन्तु सफलं कर्म्म कुर्व्वन्तु सततं शुभम् ॥
व्रीहियवमाषतिलमुद्गमिश्रितसर्षपान् ।
तान् प्रक्षाल्य च तोयेषु वापयेदङ्गुरार्पणम् ।
रात्रौ मुहूर्त्ते कल्याणि कारयेदङ्गुरार्पणम् ॥
ब्रह्मजज्ञानमिति सुः मध्ये ब्रह्माणमर्च्चयेत् ।
यत इन्द्र भयामहे† प्राच्यां प्रक्षेपयेद्विजः ॥
नाके सुपर्णमिति च‡ ततो दक्षिण एव तु ।
तत्त्वायामीति§ मन्त्रेण प्रतीच्यां वापयेद्विजः ।
सोमो धेनुमिति¶ सुदीच्याञ्च ओषधीर्वापयेत् क्रमात् ॥
शुद्धाभिः सिकताभिश्च प्रच्छाद्यापः प्रसेचयेत् ।
विधाय शुद्धये सर्व्वमात्मानमिति मन्त्रतः ॥
आसप्तमाद्यजानाश्च आयष्ठात् पुत्रनाप्तनम् ।
पञ्चमाद्रक्षिमान् विष्णो सर्व्वकामफलप्रदे ॥
चतुर्थे चाङ्कुरं विद्यात् पापीयान् जायते तु सः ।

---

* ब्रह्मजज्ञानमिति मन्त्रोऽयं प्रथमखण्डस्य १०९ पृष्ठे प्रदर्शितः ।

† यत इन्द्रेति ऋगियं प्रथमखण्डस्य ३१५ पृष्ठे प्रदर्शिता ।

‡ नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षतत्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥

१०म १३५म ४मऋ ।

§ तत्त्वायामीति ऋगियं द्विविधा, प्रथमखण्डस्य ४८।११९ पृष्ठयोर्दर्शिता ।

¶ सोमो धेनुमिति ऋगियं प्रथमखण्डस्य ३२१ पृष्ठे प्रदर्शिता ।

त्रयाहे सर्व्वकामानामङ्कुराहनि चोद्यते ॥
आयुष्करं श्रीप्रदञ्च शुभेष्वन्येषु सर्व्वगः ।
तस्मात्सर्व्वेषु कार्य्येषु वापयेदङ्कुरार्पणम् ।
यदङ्कुराणां रहितं तत्कर्म्माशुभकारणम् ॥
सद्योऽङ्कुरार्पणं वापि सद्यः कर्त्तुं समीहितः ।
अशक्तौ तण्डुलैः शुद्धैः सद्य एव शुभाङ्कुरैः ॥
पालिकानि प्रपूर्य्यैवं पञ्च त्रीण्येकमेव वा ।
अलङ्कृत्य च पद्माद्यैः पुष्पैरापूर्य्यतेऽपि च ।
अङ्कुरोक्ताः क्रियाः सर्व्वास्तैस्तैरेव समाचरेत् ॥
ओषधीनाञ्च सर्व्वासां चन्द्रः प्रोक्तोऽधिदैवतम् ।
तस्मात्सर्व्वप्रयत्नेन तेन रात्र्यङ्कुरार्पणम् ॥
वास्तुकर्म्मणि चौले च दिवा स्यादङ्कुरार्पणम् ।
अन्यत्र रात्रौ कुर्व्वीत न तथाङ्गि कदाचन ॥
आधानं गर्भसंस्कारं जातकर्म्म च नाम च ।
हित्वाङ्कुरार्पणं विद्यादन्यत्र शुभकर्म्मसु ॥

इति श्रीनकोक्तमङ्कुरार्पणविधानम् ।

अथास्य स्पष्टप्रयोगो लिख्यते । यथा—

गर्भाधानादिनामान्तकर्म्माणि मुक्ता अन्नप्राशनादिविवाहान्तेषु अपत्यसंस्कारेषु नवग्रहप्रवेशाद्यन्येष्वपि शुभकर्म्मसु च करिष्यमाणकर्म्मणः पूर्व्वं नवमे सप्तमे पञ्चमे तृतीये दिने सद्यो वा अङ्कुरार्पणं कर्त्तव्यम् ।

तत्रायं क्रमः । पालिकादिसम्भारानुपकल्प्य सस्नातः पीठोप-

विष्टो यजमानस्त्रियादि सङ्कीर्त्य अमुककर्मसाफल्यनिरन्तरशुभत्व-मित्यिद्वारा परमेश्वरप्रीत्यर्थमङ्गुरार्पणाख्यं कर्माह करिष्ये इति सङ्कल्प्य शुद्धभूमिमुपलिप्य रङ्गवल्लयादिभिरलङ्कृत्य तत्र सिता-नन्तान् सम्यक्कीर्य्य तत्र नवत्रेणुपात्रं किञ्चिदम्भोभिः सूत्रेणावेष्ट्य तदेव पालिकात्वेन सस्थाप्य तत्र वल्मीकमृत्तिका ऋदपङ्कं शुष्क-गोमयचूर्णञ्च प्रक्षिप्य पालिकामू(लें)ल खेततण्डुलैः पूरयित्वा दूर्वाङ्कुराश्वत्थशिरोपरिस्थपत्राणामुपरि शुभे मुहूर्त्ते नवत्रेणुपात्रं प्रक्षिप्य नितरत्नाहरितवर्णानि पुष्पाण्यवकीर्य्य मध्यादिपञ्चस्थानेषु ब्रह्मादिदेवान् पूजयेत्।

तत्र ब्रह्मजज्ञान नकुलो ब्रह्मा त्रिष्टुप्। अनेन पालिकामध्ये ब्रह्माणमावाहयेत्। यत इन्द्र भयामहे भग इन्द्रो हवतो। अनेन पूर्व्वभागे इन्द्रम्। नाके सुपर्ण यमो यमस्त्रिष्टुप्। अनेन दक्षिणे यमम्। तत्त्वायामि वरुणस्त्रिष्टुप्। अनेन पश्चिमे वरुणम्। सोमो धेनुं सोतम: सोमस्त्रिष्टुप्। अनेन चोत्तरे सोममावाहयेत्। एवं ब्रह्मादिलिङ्गैरन्यैर्वा स्वशाखोक्तैर्मन्त्रै-र्ब्रह्मादिपञ्चदेवान् यथाक्रमेणावाह्य ब्रह्मणे नमः। इन्द्राय नमः। यमाय नमः। वरुणाय नमः। सोमाय नमः। इति नाम-मन्त्रैरासनादिक्रमेण* षोडशोपचारैः पदार्थानुसमयेन काण्डानु-समयेन वा पञ्च देवताः सम्यगभ्यर्च्च्य पालिकापश्चिमतः कर्त्ता प्राङ्मुखस्तिष्ठन् उपतिष्ठेत। तत्र मन्त्राः—

---

* पाद्यादिक्रमेण इति ख पुस्तके पाठः।

दिशां पतीन्नमस्यामि सर्व्वकामफलप्रदान् ।
कुर्व्वन्तु सफलं कर्म्म कुर्व्वन्तु सततं शुभम् ॥ इत्यादयः* ।

ततो व्रीहियवमाषतिलमुद्गसर्षपान् गोमयतोयेन प्रक्षाल्य ब्रह्मजज्ञानमित्यादिभिः पूर्व्वोक्तैः पञ्चभिर्मन्त्रैः† क्रमेण पञ्चसु स्थानेषु बीजानावपेत् । ततः शुद्धाभिः सिकताभिः प्रच्छाद्य अपः प्रसेचयेत् । त(तः)च्च पञ्चगव्यं समन्त्रकं प्रसिञ्चेदिति अन्यान्तरे उक्तम् ।

सद्योऽङ्कुरार्पणपक्षे ब्रह्मादिदेवतावाहनादि कृत्वा शुद्धैस्तण्डुलैः स्वतः सिद्धैर्धान्याङ्कुरैश्च पालिकां प्रपूर्य्य पद्मादिपुष्पैरलङ्कृत्य अङ्कुरोक्ताः सर्व्वाः क्रियास्तैरेव कारयेत् ।

इदमङ्कुरार्पणाख्यं कर्म्म रात्रौ कार्य्यम् । वास्तुकर्म्मणि चौलकर्म्मणि च दिवैव कार्य्यम् । पञ्चपालिकादिपक्षेऽपि प्रतिपालि-(का)क्रमेयमेव क्रियावृत्तिः । वंशपात्ररूपा पालिकेति प्रयोग-पारिजातोक्तिः । विश्वप्रकाशादौ तु धातुमयरूपा दारुमयरूपा वा ग्राह्या ।

इति श्रीविधानपारिजाते अङ्कुरार्पणविधानम् ।

अथ कौतुकबन्धविधानम् ।

तथाच गौनकः ।

अथ कौतुकबन्धस्य प्रयोगोऽत्र निगद्यते ।
विवाहादौ शुभे कार्य्ये रात्रौ वाह्नि कृते तथा ॥

* १२ पृष्ठे उक्ता ।
† १२ पृष्ठे प्रदर्शिते ।

माङ्गरे पाल्लिकायुक्ते स्थले दुन्दुभि(पूरिते)नादिते ।
महाचतेन कांस्येन सोदकुम्भं निधाय च ।
कार्पासोऽवसूत्रन्तु त्रिगुणीकृत्य पञ्च वा ॥
निधाय तण्डुलान् पात्रे वूर्च्चं कुम्भं निधाय च ।
कुम्भैः कुम्भोदकैर्मन्त्रैः प्रोक्ष्य विप्रः सुखासने ॥
भूर्भुवः स्वः सावितया ऋग्भिर्वेदादिभिस्तथा ।
आपो हिष्ठादिकाब्लिङ्गैः शुद्धवत्यघमर्षणैः ॥
शुद्धवत्या स्वस्तिमत्या पावमानैस्तथैव च ।
रुचोहणञ्च रात्रिञ्च क्षणुध्वमिति तथैव च ॥
तरत्समन्दीं पुरुषं विष्णुसूक्तं तथैव च ।
अतो देवा अवन्त्विति परो मात्रा तथैव च ॥
श्रीसूक्तं शिवसङ्कल्पं वायुसूक्तं तथैव च ।
सुश्चामि त्वेति सूक्तञ्च स्योना पृथ्वि भवेति च ॥
द्रविणोदाः सवितेति नवो विघ्नं नयेति च ।
उलूकया पिशङ्गेति ऋग्भिरेताभि(र्ऋ)र्त्विजः॥ ॥

---

* प्रथमखण्डस्य १७६ पृष्ठे १० पङ्क्तौ दृश्यम् ।

† प्रथमखण्डस्य १८४।१८५।१८६ पृष्ठेषु दृश्यम् ।

‡ पुरुषसूक्त त्रिपादूह इत्यादिकं पञ्चोदशर्चं प्रथमखण्डस्य १२५।१२६ पृष्ठयो प्रदर्शितम् ।

§ वायुसूक्तमाधारम्—"वात आवातु भेषजं शम्भु मयोभु नो हृदे ।
प्र ण आयूंषि तारिषत् ॥"
मन्त्रोऽयं ऋग्वादिपाठपूर्वकं पाद्य इति सुखासुखदानपद्धतौ वर्त्तमानपद्धतये ।

॥ एते मन्त्रा अनुपदमेव दर्शयिष्यन्ते ।

जातवेदस इत्यृचा* सूत्रमादाय लेपयेत् ।
गन्धेन दक्षिणे हस्ते बध्वा: पुंसस्तु तन्तुना ॥
विश्वेत्ता ते सवनेति स्त्रीणा सव्यकरे तथा ।
श्रिये जात ऋचैकयाऽध्वर्युश्च समाहित: ॥
अत जीवेति ताभ्याञ्च हस्तसामेत्यृचैकया† ।
ये यज्ञेन तथाष्टाभिस्त्रियम्बकसृचैकया‡ ॥
भस्मना चाक्षतैर्वापि रक्षा कृत्वा समापयेत् ।
दद्यादाचार्य्ये हेमादि ऋत्विग्भ्य: पूज्य शक्तित: ।
विद्वान् सर्व्वप्रयत्नेन कुर्य्यात् कौतुकबन्धनम् ॥ इति ।

अथास्य प्रयोग: ।

विवाहादौ शुभकर्म्मणि साङ्गुरे पालिकायुक्ते स्वस्ते मङ्गलतूर्य्यनादे कृते सति कौतुकबन्धं कुर्य्यात् । तत्रायं क्रम: । आचार्य्यो दर्भमये कूर्चे उदकुम्भं निधाय साक्षतकास्यपात्रे पञ्चगुणितं त्रिगुणितं वा कार्पाससूत्रं निधाय च तत्समीपे यजमानमुपवेश्य कुशहस्तैर्ऋत्विग्भि: सह कुम्भोदकेन तत् सूत्रमभिषिञ्चेत् ।

---

* प्रथमखण्डस्य ४१७ पृष्ठे प्रदर्शितया ।

† प्रथमखण्डस्य १६० पृष्ठे प्रदर्शितया ।

‡ ऋक्तृचार्थो गोभिलोक्तो—

त्वामिद्धि हवामहे साता वाजस्य कारव ।
त्वां वृत्रेष्विन्द्र सत्पति नरस्त्वा काष्ठास्वर्वत ॥

अस्य च पाठे कार्य्य इति तर्कवाचस्पतय ।

§ त्र्यम्बक यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ इयं ६०म यजु ।

तत्र मन्त्रा.॥

व्याहृतिपूर्वा गायत्री*। अग्निमीळे†। इषे त्वोर्ज्जे त्वा‡। अग्न आयाहि§। शन्नो देवो¶। आपो हि ष्ठेति नवर्चम्‖। एतो न्विन्द्रम्**। कृतं चेति मन्त्रद्वयम्††। प्रणदायेति मन्त्रः‡‡। स्वस्ति नो मिमीतामिति मन्त्रत्रयम्§§। स्वादिष्ठयेति दशर्चं सूक्तम्¶¶।

---

* प्रथमखण्डस्य ७९ पृष्ठे प्रदर्शिता।

† अग्निमीळे इति मन्त्रोऽयं प्रथमखण्डस्य ११० पृष्ठे प्रदर्शितः।

‡ इषे त्वोर्ज्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे। १ अ १म मन्त्रः।

§ अग्न आयाहीति मन्त्रोऽयं प्रथमखण्डस्य ११० पृष्ठे प्रदर्शितः।

¶ शन्नो देवीरिति मन्त्रोऽयं प्रथमखण्डस्य २० पृष्ठे प्रदर्शितः।

‖ आपो हि ष्ठेति नवर्चं प्रथमखण्डस्य ५८ पृष्ठे प्रदर्शितम्।

** एतो न्विन्द्रमिति मन्त्रोऽयं प्रथमखण्डस्य १४१ पृष्ठे प्रदर्शितः।

†† कृतं चेति मन्त्रद्वयं प्रथमखण्डस्य १४६ पृष्ठे प्रदर्शितम्।

‡‡ प्रणदाय मरुताय स्वभानव इमो वाजमभि वाजसातये।
धर्मन्नुभे दिव आ पृष्ठयज्वन सुम्नधृषे सहि शवसानमर्चत॥ ५म ५४सू १ऋक्।

§§ स्वस्ति नो मिमीतामश्विना भग स्वस्ति देव्यदितिरनर्वणः।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना॥ ११॥
स्वस्तय वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः।
बृहस्पतिं सर्वगणं स्वस्तय स्वस्तय आदित्यासो भवन्तु नः॥ १२॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये।
देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः॥ ५म ५१सू १३ऋक्।

¶¶ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥ १॥
रक्षोहा विश्वचर्षणिरभि योनिमयोदहम्। द्रुणा सधस्थमासदत्॥ २॥
वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः। पर्षिष्ठो अप्नसामुपः॥ ३॥

रक्षोहणमिति पञ्चविंशर्चं सूक्तम्*। रात्रिर्व्यख्यदित्यष्टर्चं सूक्तम्†। क्रत्वेति पञ्चदशर्चं सूक्तम्‡। तरत् स मन्दीति ऋक्चतुष्टयम्§। सहस्रशीर्षेति षोड़शर्चं सूक्तम्॥। विष्णो-र्नु कमिति षड्ऋचं सूक्तम्¶। अतो देवा इति षड्ऋचं

अग्ने सहानो देवाना यक्षीसध्यसा। अभिशस्तिपा अस ॥ ४ ॥
त्वामच्छावदामसि महिदग्रे दिवे दिवे। इन्दो त्वे न आविश ॥ ५ ॥
पुनाति ते परिस्रुत सोम सूर्यस्य दुहिता। वारेण शश्वता तना ॥ ६ ॥
तमीमण्वी समर्य आरुभन्ति योषणो दश। स्वसार पार्ये दिवि ॥ ७ ॥
तमी हिन्वन्त्यग्रुवो वनानि वाजिन हितम्। विधातु धारण मघु ॥ ८ ॥
अभीम सप्रथा नर सोमासद पवित्र आ सृजम्। सीमस्मिन्द्राय पातवे ॥ ९ ॥
अस्येदिन्द्रो मदेष्वा विश्वा इवाणि जिघ्नते। शूरो मघा च मंहते ॥

ऋग्वेद १म १मं १०सूक्त।

* रक्षोहणमित्यादिक सूक्त प्रथमखण्डस्य १४०।१४१।१४२ पृष्ठेषु प्रदर्शितम्।

† रात्रिर्व्यख्यदित्यादिक रात्रिसूक्तं प्रथमखण्डस्य १६४।१६५ पृष्ठयोरुक्तम्।

‡ क्रत्वेत्यादिक सूक्त प्रथमखण्डस्य १५८।१५९।१६० पृष्ठेषु उक्तम्।

§ तरत् स मन्दी धावति धारा सुतस्यान्धस। तरत् स मन्दी धावति ॥ १ ॥
आपवस्व मदिन्तम पवित्र सोम रोचय। अर्के यवाऽपि वारय ॥ २ ॥
अत्य मवाम आयव पद नवीयो अक्रमु। रुपे अजनय सूर्यम् ॥ ३ ॥
अया सोम सुकृत्यया महे द्रोणानि धावय। मघवद्य योनौ सीद ॥

सामवेद, अथवा ऋग्वेद ९म ५९ ४सूक्त।

¶ सहस्रशीर्षेत्यादिक सूक्त प्रथमखण्डस्य १८४।१८५।१८६ पृष्ठेषु प्रदर्शितम्।

‖ विष्णोर्नु क वीर्याणि प्रवोच य पार्थिवानि विममे रजासि।
यो अस्कभायदुत्तर सधस्थ विचक्रमाणस्त्रेधोरुगाय ॥ १ ॥
प्र तद्विष्णु स्तवते वीर्येण मृगो न भीम कुचरो गिरिष्ठा।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २ ॥

सूक्तम्*। परो मात्रयेति समर्षं सूक्तम्^।

ॐ विष्णवे शपमेतु मन्म गिरिक्षित उरुगायाय वृष्णे।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥ १ ॥
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ २ ॥
तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ ३ ॥
तावां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥ १म १५४म ६ऋक्।

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः ॥ १ ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे ॥ २ ॥
त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् ॥ ३ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥ ४ ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥ ५ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥
१म १५५म ६ऋक्।

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ १ ॥
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ॥ २ ॥
प्रतीची ते दिक्पवमानानिरावृत्सोमो वशी सहमानो अस्मे।
अभक्तो विश्वा भुवनानि तस्थौ यत्र देवासः पनयन्त पूषा ॥ ३ ॥
उरावन्तरिक्षे मम पाद्युरु विष्णो क्रमस्व। उरु क्षयाय नस्कृधि ॥ ४ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥ ५ ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥ ६ ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदम् ॥
१म १५६म ६ऋक्।

---

* ऋग्वेदे प्रथममण्डलस्य १५४ सूक्तम्।
^ ऋग्वेदे प्रथममण्डलस्य १५५ सूक्तम्।

हिरण्यवर्णामिति पञ्चदशर्चं सूक्तम्॥ यज्ञायत इति षड्ऋचं सूक्तम्॥ वीतिहोत्रेति पञ्चर्चं वायुसूक्तम्॥ सुत्रामीति

यय मनीषा हृदयं हृदस्पतेः प्रशिषा देवी नयति प्रचेतसी।
रेरे वां श्लोक आ दिवो पिन्वतमिषो हजनेष्विन्द्र॥ ६॥
वयद्वते दिवो अक्रक्षदोमि तन्तं सुतस्य मिमिविष्ट इत्यम्।
कर्वेनु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥

७म ८८सू. ७ऋक्।

हिरण्यवर्णामिति सूक्तं प्रथमस्याष्टम्या २६।२६५ दृष्टयोरुक्तम्।
यज्ञायतो दूरमुदैति दैव तदु सुप्तस्य तथैवेति।
दूरङ्गम ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ १॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ २॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥ ३॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्व्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥ ४॥
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्व्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ ५॥
सुसारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥

२४म. ६म. यजुः।

वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि। अग्ने बृहन्तमध्वरे॥
अथा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि। विश्वासु धीषु वन्द्य॥
आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम्। विश्वासु पृत्सु दुष्टरम्॥
आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम्। मार्डीकं धेहि जीवसे॥
अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु। येन देवा धनं दधुः॥ सामवेदः।

पञ्चर्चं सूक्तम्* । स्यो ना पृथिवि† । द्रविणोदा‡ । सविता यन्त्रानात् § । नवो नवो भवति ¶ । विद्युद्र या पतन्ती ‖ । उलूकयातुम्** । पिशङ्गसृष्टिम्†† । एता मात्र ऋच । एतैर्व्याहृत्यादि पिशङ्गसृष्टिमित्यन्तैर्मन्त्रै कूर्चेन कलशोदकेन सूत्र

---

* सुशर्मास्ति त्वा सुविदत्रा शीवतात उरुशंसादुत राजयशसात् ।
यासिसत्याद यदि वै तदेत तस्या इन्द्राग्नी अभिसुक्रमेतम् ॥ १ ॥
यदि दिवातरादि वा नक्तं यदि मृत्यो रजिक नाम एव ।
सहसाहरामि निर्ऋतेरुपस्था दस्यामेनं शतशारदाय ॥ २ ॥
सहसाक्षाय शतशारदाय शतायुषा हविषा हार्षमेनम् ।
शतं यथेम शरदो न मासो न्द्रश्च विश्वे दुरितस्य पारम् ॥ ३ ॥
शतं जीव शरदो वर्धमान शतं हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ ४ ॥
आहार्षं त्वा विदं त्वा पुनरागा पुनर्नव ।
सर्वाङ्ग सर्व ते चक्षुः सर्वमायुष तेऽविदम् ॥ ५ ॥ १०म १६१सू ५ऋक् ।

† स्यो ना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा न शर्म स प्रथ ॥
१म २२सू १५ऋक् ।

‡ द्रविणोदा पिपीषति जुहोत प्र च तिष्ठत । नेष्टादृतुभिरिष्यते ॥ २६ष २२म यजु ।

§ सविता यन्त्रानात् सविता पुरस्तात् सविता तरात्सविताधरात्सविता ।
सविता न सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥ १०म २६सू १७ऋक् ।

¶ नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो विदधात्य यन् प्रचन्द्रमास्तिरते दीर्घमायुः ॥ १०म ८५सू १२ ऋक् ।

‖ विद्युद्र या पतन्ती दविद्योद्भरन्ती मे अपो दाक्षायणि ।
सनिष्टा अघोनस्य सुशस्ति भावरी निरत दीर्घमायुः ॥ १०म ६५सू १०ऋक् ।

** उलूकयातुं शुशुलूकयातु जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातु दृषदेव रक्ष इन्द्र ॥ ७म १०४सू २२ऋक् ।

†† पिशङ्गसृष्टिमवध्वं पिशाचिमिन्द्र सं मृण । सर्वा रक्षो निबर्हय ॥ १म १६२सू ५ऋक् ।

मभिषिच्य जातवेदस इति मन्त्रेण गन्धेन सूत्रं लेपयित्वा विश्वेत्ता तः इति मन्त्रेण आचार्यः पुंसो दक्षिणहस्ते सूत्रं बध्नीयात्। स्त्रियास्तु श्रिये जात इति मन्त्रेण वामहस्ते बध्नीयात्। तत ऋत्विजोऽध्वर्युर्यजमानस्य ममत्वं रक्षां कुर्युः। तत्र मन्त्राः। शतं जीवेति द्वयम्॥ ये यज्ञेनेत्यष्टर्चम्§। त्र्यम्बकं यजा-

---

विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते।
नारायस यत् पुरुरूपमुक्थवाहसो भरमाय कृणुषे समृक्वसे॥ ऋग्० १०७सू १क्तक्।
मयमस्वष्टम्य १६० इष्टे प्रदर्शितेन।
२२ इष्टे ११—१४ मन्त्रेषु प्रदर्शितम्।
ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानव सुमेधस॥
य ऊदराजन् पितरो गोमय वस्वृतेनाभिन्दन् परिषदरे अद्रयम्।
दीर्घायुत्वमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानव सुमेधस॥ २॥
य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातर वि।
सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानव सुमेधस॥ ३॥
अय नाभा नदति बभ्रु वो रवे देवपुत्रा ऋषयस्तुजोषस।
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधस॥ ४॥
विरूपास ऋषयस्त्वष्टजामयोऽङ्गीरसो बहवो मेषजा भिषक्।
ते अङ्गिरस सुतसोमे अग्नौ परिजज्ञिरे॥ ५॥
ये अग्नेः परिजज्ञिरे विरूपासो दिवस्परि।
सहस्रकक्षा अङ्गिरसस्तेषां श्रीरस्तु मह्यते॥ ६॥
इन्द्रेण युजा नि जनान् बाधतो व्रज गोमन्तमक्षिणम्।
सहस्र मे ददतो अष्टकर्ण्य एवो देवेषवत॥ ७॥
प्र सू ज्ञानायास्यद मनो दक्षायो उग्रो दीक्षाय चोदतु।
य सहस्र शताय गव्यो दानाय चोदते॥ १०म १२५सू ८क्तक्।

महे इति च*। ततो यजमानः कर्मसाद्गुण्यार्थमाचार्यादिभ्यो यथाशक्ति दक्षिणां दद्यात्।

कर्मादौ बन्धनं प्रोक्तं कर्मान्ते तद्विसर्जनम्।

तत्र मन्त्रो यथा।

कङ्कणं मोचयाम्यद्य रक्षा (न तु) तु न कदाचन।
मयि रक्षां विधायाशु देव त्वं गच्छ कङ्कण॥

इति मन्त्रेण कङ्कणं विसृजेत्।

इति शौनकोक्तं कौतुकबन्धनविधानम्।

अथ कात्यायनमतानुसारि कौतुकबन्धनविधानम्।

विनायकं नमस्कृत्य गिरिपुत्रीञ्च मूर्द्धनि।
कात्यायनमनुप्रोक्तो रक्षाबन्धो विधीयते॥
विनायकं तु संपूज्य गुडैर्गन्धाक्षतादिभिः।
प्राणायामत्रयं कृत्वा सङ्कल्पञ्च यथाविधि॥
प्रक्षाल्य कांस्यपात्रन्तु कुशभस्मजलेन च।
ताम्बूलं तत्र विन्यस्य भस्मना सहितं तथा॥
सौवर्णं राजतं वापि क्षौमं कार्पासमेव वा।
तन्तुत्रयं तथा पुंसां स्त्रीणान्तु द्विगुणीकृतम्॥
पावमानेन मन्त्रेण† सूत्रञ्चैवाभिषेचयेत्।
आपो हि ष्ठेति मन्त्रेण‡ संस्कार्य्यस्याभिषेचनम्॥

---

* मन्त्रोऽयं १० पृष्ठे प्रदर्शितः।

† सङ्कल्पञ्च प्रतिसारमुक्तविधिः पावनं कृत्वम्।
तेन त्वामभिषिञ्चामि पावमा(नी)स्त्र पुनन्तु मे॥ एवमादिरूपेण।

‡ मन्त्रोऽयं पृष्ठे ५८ पृष्ठे प्रदर्शितेन।

सूत्रं गन्धेन संलिम्पेदंशुना तेति* मन्त्रतः ।
दीर्घायुस्तेति मन्त्रेण† ओषधिं योजयेद्दृढम् ॥
त्रियम्बकेन मन्त्रेण‡ भूतिं दत्त्वा ललाटके ।
तूष्णीं ततो द्विवारञ्च भस्म दद्यात्तथैव च ॥
यदाबध्नेति मन्त्रेण§ पुंसो वै दक्षिणे करे ।
बध्नीयात् सूत्रकञ्चैव स्त्रियाश्चेद्वामके करे ।
त्रीणि त आहुर्मन्त्रेण¶ इति कात्यायनोदितम् ॥
इति कात्यायनोक्तं कौतुकबन्धविधानम् ।

अथ हविर्याजम् ।

तथाच आश्वलायनकारिका ।

स्यादाभ्युदयिकं श्राद्धं हविर्पूर्त्तेषु कर्म्मसु ।

हविर्पूर्त्तशब्दार्थं स्वयमेवाह ।

---

* अंशुना ते अंशुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ २०अ. २७म. यजु० ।

† दीर्घायुस्त्वौषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ १२अ. १००म यजु० ।

‡ प्रथमखण्डस्य १८१ पृष्ठे उक्तेन ।

§ यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत्र आबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ ३४अ ५२म. यजु ।

¶ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥ १म १६४सू ७क्रम् ।

मह इति च्छ। ततो यजमानः कर्म्मसादगुणार्थमाचार्य्यादिभ्यो यथाशक्ति दक्षिणां दद्यात्।

कर्म्मादौ बन्धनं प्रोक्तं कर्म्मान्ते तद्विसर्जनम्।

तत्र मन्त्रो यथा।

कङ्कणं मोचयाम्यद्य रक्षां (न तु) तु न कदाचन।
मयि रक्षां विधायाशु देव त्वं गच्छ कङ्कण॥

इति मन्त्रेण कङ्कणं विसृजेत्।

इति गौनकोक्तं कौतुकबन्धनविधानम्।

अथ काल्यायनमतानुसारि कौतुकबन्धनविधानम्।

विनायकं नमस्कृत्य गिरिपुत्रीञ्च मूर्द्धनि।
काल्यायनमनुप्रोक्तो रक्षाबन्धो विधीयते॥
विनायकं तु संपूज्य गुडैर्गन्धाक्षतादिभिः।
प्राणायामत्रयं कृत्वा सङ्कल्पं च यथाविधि॥
प्रक्षाल्य काम्यपात्रन्तु कुशमक्षजलेन च।
ताम्बूलं तत्र विन्यस्य भस्मना सहितं तथा॥
सौवर्णं राजतं वापि क्षौमं कार्पासमेव वा।
तन्तुत्रयं तथा पुंसां स्त्रीणान्तु त्रिगुणीकृतम्॥
पावमानेन मन्त्रेण* सूत्रञ्चैवाभिषेचयेत्।
आपो हि ष्ठेति मन्त्रेण† संस्कार्य्यैस्त्वाभिषेचनम्॥

---

* सङ्कल्प १० पृष्ठे प्रदर्शितं।

† अहस्त्वाद्य अनघारसूर्भिः पावत्र कृतम्।
तेन त्वामभिषिञ्चामि पावमा(नी)य पुनन्तु ते॥ एवमादिरूपेण।

‡ प्रथमखण्डस्य ४८ पृष्ठे प्रदर्शितेन।

सूत्रं गन्धेन संलिम्पेदंशुना नेति* मन्त्रतः ।
दीर्घायुस्तेति मन्त्रेण† आशिषा योजयेद्दृढम् ॥
त्रियम्बकेन मन्त्रेण‡ भूतिं दत्त्वा ललाटके ।
तूष्णीं ततो द्विवारञ्च भस्म दद्यात्तथैव च ॥
यदाबध्नेति मन्त्रेण§ पुंसो वै दक्षिणे करे ।
बध्नीयात् सूत्रकञ्चैव स्त्रियाश्चेद्वामके करे ।
त्रीणि त आहुर्मन्त्रेण¶ इति कात्यायनोदितम् ॥
इति कात्यायनोक्तं कौतुकबन्धविधानम् ।

अथ हडिश्राद्धम् ।

तथाच आश्वलायनकारिका ।
स्यादाभ्युदयिकं श्राद्धं हडिपूर्त्तेषु कर्म्मसु ।
हडिपूर्त्तेशब्दार्थं स्वयमेवाह ।

---

* अयमा ते अर्य इष्पतां मरुता यज ।
गन्धर्वो विश्वावसुस्त्वा पतिर्मुञ्चत्वंहसः ॥ २०म २७म यजु ।

† दीर्घायुत्वं चोपवेत्तं खनित्रा यज्ञे च त्वा खनामहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ १२म १००म यजु ।

‡ प्रथमाह्निकस्य १८१ पृष्ठे उक्तोऽयम् ।

§ यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत्त्व आबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ ४४म ५२म यजु ।

¶ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीणन्तः समुद्रे ।
उतैव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहु परमं जनित्रम् ॥ १म १६१ऋ ४क्ष् ।

पुंस सवनसीमन्तचौलोपनयनेष्विह ।
विवाहे चानलाधानप्रभृतिर्यौतकर्म्मसु ॥
इट श्राद्ध प्रकुर्व्वन्ति द्विजा इद्धिनिमित्तकम् ।
अन्ये षोडशसंस्कारव्यापरणादिष्वपीष्यते ।
वाप्याद्युदयापनादौ तु कुर्य्यु पूर्त्तनिमित्तकम् ॥ इति ।

चन्द्रिकाया विष्णुपुराणे ।

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मन ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखान् पितृनादौ तर्पयेत् प्रयतो गृही ।
तानिष्ट्वा पिण्डयज्ञेन वैदिक कश्चिदाचरत् ॥

ब्राह्मेऽपि ।

जन्मन्यथोपनयने विवाहे पुत्रकस्य च ।
पितृन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम् ॥
वेदव्रतेषु चाधानयज्ञपुंसवनेषु च ।
नवान्नभोजने स्नाने भार्य्याया प्रथमार्त्तवे ॥

स्नाने समावर्त्तने ।

देवारामतडागादिप्रतिष्ठासूत्सवेषु च ।
राजाभिषेके बालान्नभोजने द्विजसत्तमान् ॥
नान्दीमुखान् पूज्यतमान्स्वया मातृगणानपि ।

---

* नान्दीमुख पितृगणम् इति कल्पतरौ पाठ ।

वनस्थाद्याश्रमं* गच्छन् पूर्व्वेद्युः सद्म एव च।
पितॄन् पूर्व्वोक्तविधिना तर्पयेत् कर्म्मसिद्धये॥ इति।

क्वचिन्नान्दीश्राद्धस्य सन्वत्वमाह।

गणगः क्रियमाणानां मातॄणां पूजनं सकृत्।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु॥

अस्यार्थः। देशान्तरगतस्य चिरकालायूयमाणसद्भावस्य मृतबुद्धा पुत्रादिना कृतप्रेतकार्य्यस्य कालान्तरे समागतस्य तस्यैव यदा जातकर्म्मादयः संस्कारा युगपत् क्रियन्ते,—अथवा उपनयनात् प्राक् स्वकाले कथञ्चिदकृतचौलपर्य्यन्तसंस्कारस्य जातकर्म्मादीनि यदा उपनयनकाले सभूय क्रियन्ते,—तदा तेषु संभूय क्रियमाणेषु संस्कारेषु मातृपूजाया नान्दीश्राद्धस्य च सकृत्तन्त्रेण प्रथमतः क्रियमाणकर्म्मणः आदावनुष्ठानं कर्त्तव्यम्, न पृथगादिषु नाहृत्या संस्कारकर्म्मणामादिषु कार्य्यमित्यर्थः।

अत्र मातृपूजनं पूर्व्वमुक्तं विष्णुपुराणे।

तत्रापि मातरः पूर्व्वं पूजनीयाः प्रयत्नतः।
अकृत्वा मातृयागन्तु वैदिकं यः समाचरेत्।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः॥ इति।

मनुरपि।

कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिता. पूजयन्ति ताः॥

---

* वानप्रस्थाश्रमादिकं, यदा गृहस्थाश्रमं विहाय वनं गन्तुमिच्छेत्तदेत्यर्थः।

मातर उक्तायतुर्विंशतिमते ।

श्राद्धे ह्यभ्युद(ये)यप्राप्ते देवतास्थापनं स्मृतम् ।
जातिधर्मैकुलश्रेणीलोकाना हृद्विकारकम् ॥
तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा ।
इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाष्टमी ॥
ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान् ।
हृद्यादौ पूजयित्वा तु पश्चान्नान्दीमुखान् पितॄन् ॥
मातृपूर्व्वान् पितॄन् पूज्य ततो मातामहानपि ।
मातामहीमतः केचिदुग्मा भोज्या द्विजातयः ॥

अस्यार्थः । वृद्धिश्राद्धे कर्त्तव्ये सति पूर्व्वं स्थण्डिलादौ मातृगणः संपूज्यस्तद्यथा पितृपक्षे तिस्रो मातृपितामहीप्रपितामह्यः पूज्याः । तथा मातामहवर्गे मातामह्यादयस्तिस्रः पितृष्वसा मातृष्वसेत्यष्टौ मानुष्यो मातरः । ब्रह्माण्याद्याः सप्त देवमातर । तथा दुर्गागणाधिपक्षेत्राधिपाश्च षोडशैरुपचारैः संपूज्य नान्दीमुखान् पितॄन् श्राद्धेन पूजयेदिति प्रयोगपारिजाते व्याख्यातम् ।

अथवा कात्यायनोक्ता मातरः पूज्याः यथा ।

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
आवाह्य गन्धपुष्पाणि धूपं दीपं निवेदयेत् ॥

तथा वसोर्धारामातरः कुम्भे समालिख्य पूज्या इत्युक्तं तत्रैव ।

कुशजलघ्ना वसोर्धाराः पञ्च वाथ घृतेन तु ।
कारयेत्सप्तधारा वा नातिनीचा न चोच्छ्रिताः ॥
आयुष्याणि च शान्त्यर्थं जपित्वाथ समाहितः ।
षड्भ्यः पितृभ्यस्सदतु श्राद्धदानमुपक्रमेत् ॥ इति ।

इदं कात्यायनपरिशिष्टोक्तकातीयानां काण्वमाध्यन्दिनानामेवेति वेदितव्यम् । षड्भ्यः पितृभ्य इति । तेषां सूत्रे नान्दीश्राद्धस्य षड्वेत्यभिधानादविरुद्धम्, षड्वेयं वा स्वगृह्योक्तमिति वचनानुग्रहाच्च । प्रयोगपारिजातकृता तु षड्भ्यः श्राद्धमुपक्रमेदित्येवं व्याख्यातम् । त्रिभ्यः पित्रादिभ्यस्त्रिभ्यो मातामहादिभ्यो मातृश्राद्धपूर्वकं श्राद्धमुपक्रमेत् ।

उक्तधानन्दसन्ताने यज्ञोद्वाहादिमङ्गले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ।
ततो मातामहाः पूज्या विश्वेदेवास्तथैव च ॥

इति हेमाद्रौ मत्स्यपुराणवचनात् । तदेतदाश्वलायनशाखादिविषयत्वेन नेतुं शक्यते ।

माता पितामही चैव संपूज्या प्रपितामही ।
पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ।
एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः ॥

इत्याश्वलायनस्मरणात् । अत्र नान्दीश्राद्धे आश्वलायनकाण्वादीनां पित्रादिक्रम एव न तु प्रपितामहादिक्रमः । तत्तच्छा(खी)खिप्रवर्त्तकाश्वलायनकात्यायनाभ्यां स्वस्वसूत्रे तादृशक्रमस्य प्रदर्शितत्वात् ।

यत्तु ।

नान्दीमुखे विवाहे च प्रपितामहपूर्व्वकम् ।
नाम सङ्कीर्त्तयेद्विद्वानन्यच्च पितृपूर्व्वकम् ॥

इति हरवशिष्ठवचनं तदेतच्छाखान्तरीयमिति मन्तव्यम् । हेमाद्र्यादयोऽप्येवमेव मेनिरे ।

तत्कालमाह वशिष्ठः ।

पूर्व्वेद्युर्मातृकं श्राद्धं मध्याह्ने पैतृकं तथा ।
उत्तरेद्यु. प्रकुर्व्वीत मातामहगणस्य तु ॥

अस्यानुकल्पमाह हरशातातपः ।

पूर्व्वाह्णे मातृकं श्राद्ध मध्याह्ने पैतृकं तथा ।
ततो मातामहानान्तु हरौ श्राद्धत्रयं स्मृतम् ॥

अत्राप्यशक्तौ हरमनुः ।

अलाभे श्राद्धकालानां नान्दीश्राद्धत्रयं बुधः ।
पूर्व्वेद्युरेव कुर्व्वीत पूर्व्वाह्णे मातृपूर्व्वकम् ॥ इति ।

हरशातातपस्तु ।

एकस्मिन्नेव यज्ञायेदेकस्मिन् पूर्व्वयामरे ।
श्राद्धत्रयं प्रकुर्व्वीत वैश्वदेवन्तु तान्त्रिकम् ॥ इति ।

श्राद्धक्रममाह प्रचेताः ।

मातृश्राद्धन्तु पूर्व्वं स्यात् पितृणा तदनन्तरम् ।
ततो मातामहानान्तु हरौ श्राद्धत्रयं स्मृतम् ॥

एतद्विवाहादिमहाकर्म्मविषयम् । अन्ये तु तदहरेव कार्य्यम् ।

तथाच गरुडपरिशिष्टम् ।

महत्सु पूर्व्वेद्युरुदहरेवाह्नेषु इति ।

अत्रिरपि ।

पूर्व्वाह्णे तु भवेद्वृद्धिर्विना जन्मनिमित्तकम् ।

पुत्रजन्मनि कुर्व्वीत आद्यं तात्कालिकं बुधः ॥ इति ।

विश्वेदेवादयोऽत्र नान्दीमुखा इति विशेषणीया इत्युक्तं हेमाद्रौ ।

ऊर्द्ध्ववक्त्रासु ये तत्र ते नान्दीमुखसंज्ञकाः । इति ।

कात्यायनसूत्रेऽपि ।

नान्दीमुखान् पितॄनावाहयिष्ये इति पृच्छतीत्यादि ।

अत्रेदं तात्पर्य्यम् । द्विविधा नान्दीमुखाः पित्रादयस्त्रयः प्रपितामहपित्रादयश्च । तत्र पित्रादयो नान्दीमुखा वृद्धिश्राद्धदेवताः ज्ञेयाः ।

पिता पितामहश्चैव तथैव प्रपितामहः ।

त्रयो ह्यभ्युदया ह्येते पितरः परिकीर्त्तिताः ।

प्रसन्नमुखसंज्ञासु मङ्गलीया यतस्तु ते ॥

इति ब्रह्मपुराणे तेषामेव मङ्गलकर्म्मसु देवतात्वव्यवस्थात् ।

प्रपितामहस्य पित्रादयस्तु भाद्रपदपौर्णमासीनिमित्तश्राद्धे देवता इति मन्तव्यम् ।

पिता पितामहश्चैव तथैव प्रपितामहः ।

इत्युक्त्वा

तेभ्यः पूर्व्वतराः पञ्च प्रजावन्तः सुखैषिणः ।

ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥

इति तेषामपि नान्दीमुखसञ्ज्ञा विधाय

नान्दीमुखाना प्रत्यब्द कन्याराशिगते रवौ ।
पौर्णमास्यान्तु कर्त्तव्य वाराहवचन यथा ॥

इति ब्रह्मपुराणवचनात्। अत सिद्ध इहित्यार्द्धं पित्रादि-त्रिकस्यैव देवतात्वमिति। प्रयोगपारिजाते हेमाद्रौ च एवमेव व्याख्यातम्।

अन्येऽपि विशेषा कारिकायाम्।

प्राङ्मुखोऽतोपवीती स्या(द)दुपचार प्रदक्षिणम्।
तिलकार्य यवै कुर्य्यात् युग्मानत्र निमन्त्रा तु ॥
दर्भान्सूलात्तु दत्त्वैषामासनेषु तु।
प्राक्सस्येष्वप आसिच्य पूर्ववच्चानुमन्त्रा ता ॥
तिलो सोति पदस्थाने यवोऽसोति पद वदेत।
स्वधयेति पदस्थाने तुष्यामश्द वदेत्तथा ॥
पितृनिति पदात्पूर्व्व वदेन्नान्दीमुखानिति।
स्वधानम पदस्थाने वदेत् स्वाहानम पदम् ॥
अथान्यन्तु यथापाठमुक्ताध्येषावपेटयवान्।
नान्दीमुखास्तु पितर प्रीयन्तामिति मन्त्रत ॥
सम्बन्धनामरूपाणि वर्ज्जयेदत्र कर्म्मणि।
निपातो न हि सत्यस्य जातुनो विद्यते क्वचित् ॥
पित्रर्थमुपविष्टस्य सकृदर्घ्यं निवेदयेत्।
दिर्द्विर्गन्धादि दातव्यमित्यादि ॥

अन्येऽपि विशेषा स्वसूत्रादवगन्तव्या।

तथा ।

अत्र तृप्तिपरिज्ञानपर्य्यन्तं पूर्ववद्भवेत् ।
मधुवातेत्यृचः स्थाने उपास्मै गायता नरः ॥
पवस्वेत्यस्य आवयित्वात्सन्नितिं† च आवयेदृचम् ।
सम्पन्नवचनादि स्यादाचान्तेषु द्विजन्मसु ॥
द्विजभुक्तावयं सम्यग्गोमयेनोपलेपयेत् ।
अत्र मागधकान् दर्भानास्तृणाति ततः परम् ॥
पृषदाज्यं च कुर्व्वीत दध्ना (लयन्ति) नयति सर्पिषा ।
पृषदाज्येन सम्मिश्रं भुक्तशेषं हुतं भवेत् ॥
एकैकस्योक्तमन्त्रेण द्वौ द्वौ पिण्डौ तु निर्वपेत् ।
अथानुमन्त्रणादि स्यात्तत्तु नेच्छन्ति केचन ।
अथ सम्पन्नवचन विप्राणान्तु विसर्ज्जनम् ॥ इति ।

---

* उपास्मै गायता नर पवमानायेन्दवे । अभिदेवाꣳ इयक्षते ॥ ६२ ॥
यै त्वाङ्गिरसे सखवन्नवग्वे शाक्वरे हरिवो यै गविष्टौ ।
यै त्वा नूनमनुमदन्ति विप्रा पिबेन्द्र सोमꣳ सगणो मरुद्भि ॥ ६३ ॥
जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमान ।
अवर्द्धन्निन्द्र मरुतश्चिदत्र माता यद्वीर दधनद्धनिष्ठा ॥ ६४ ॥
आतू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्तीभिरसनिभि ॥ ६५ ॥
त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वा असि स्पृध ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य्य तरुष्यत ॥ ६६म ३२च यजु ।

† अयन्नवोमदन्न ह्वयप्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मतीयोक्था रिन्द्रे ते हरी ॥ ५१म २च यजु ।

तथा बहुमाढकस्यापि पिण्डमेकमेव ।

अनेका मातरो यस्य हविष्याद्ये महालये ।
अर्घ्यदानं पृथक् कुर्यात् पिण्डमेकन्तु निर्वपेत् ॥

इति लोगाक्षिवचनात् ।

तथा ।

पितृवर्गे मातृवर्गे तथा मातामहस्य च ।
जीवेत् स यदि वर्गाद्यस्तद्वर्गन्तु परित्यजेत् ॥

इति वचनाद्यदि वर्गाद्यः सम्पूर्णो वर्गो वा जीवति तदा हविष्याद्यादौ तद्वर्गस्त्याज्यः । तथा पिण्डदानमपि विकल्पेनोक्तं हविष्याद्ये ।

पिण्डनिर्वपणं कुर्यान्न वा कुर्याद्वराधिप ।

इति भविष्यपुराणवचनात् ।

आमश्राद्धं पिण्डवर्जं हवौ नान्दीमुखे सदा ।

इति हरिवंशवल्मीकवचनाच्च । अपिण्डकं हविष्याद्यमनग्निकविषयमिति केचित् ।

यावन्नाग्निसम्बन्धं उत्सवाग्निस्तथैव च ।
तावद्धविषु सर्वासु सङ्कल्पमाचमाचरेत् ॥

इति हरिवंशे ।

सङ्कल्पश्राद्धे विशेषमाह लोगाक्षिः ।

सङ्कल्पन्तु यदा कुर्यान्न कुर्यात्पाचपूरणम् ।
नावाहनं न चैवार्घ्यं नाग्नौकरणमेव च ।
विकिरं पिण्डदानञ्च श्राद्धे सङ्कल्पसंज्ञि(ति)तम् ॥ इति ।

अत्र जीवत्पितृकस्य विशेषमाह मनुः।

हुते तीर्थे च संन्यस्ते तादृ च पतिते सति।

येभ्य एव पिता दद्यात्तेभ्यो दद्यात् स्वयं सुतः॥ इति।

अस्यार्थः। पितृकर्तृके कर्मणि हुतादौ यदि पितृप्रतिनिधित्वेन पुत्रस्य कर्तृत्वं तदा पितृपितृव्यादय एव यष्टव्याः न तु स्वमातृमातामहादय इति। स्वकर्तृके स्वपत्नीनिषेकादिकर्मणि तु पितरि जीवत्यपि स्वमातृमातामहादिभ्यो दद्यात्।

पितरो जनकस्येज्या यावद्भुतमनाहितम्।

समाहितव्रतः पश्चात् स्वान् यजेत पितॄन् सदा॥

इति हुतयाज्ञवल्क्योक्तेः। समाहितव्रतः समाप्तब्रह्मचर्य इत्यर्थः।

तत्रापि प्रथमविवाहे न स्वस्य कर्तृत्वमित्याह सायनाचार्यः।

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।

अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्॥ इति।

कात्यायनोऽपि।

स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु।

पिण्डानीढ्वनात्तेषां त(द)भावे तु तत्क्रमात्॥

अत्र पिण्डशब्दः श्राद्धपरः। ओढ्वनादित्यत्र अभिविधावाङ्। ततश्च स्वापत्यस्य गर्भाधानादिप्रथमविवाहान्तसंस्कारेषु पिता स्वपितृभ्यः श्राद्धं दद्यात्। तस्य पितुरभावे तु तत्प्रतिनिधिपितृव्यादिस्तत्पुत्रादेर्जातकर्मादिविवाहान्तसंस्कारेषु तेषां संस्कार्यपित्रादीनामेव क्रमेण दद्यात्। पितुर्भ्रात्राद्यभावे तु संस्कार्यस्य भ्रात्रादिभिरपि स्वपित्रादीनामेव दातव्यम्।

असंस्कृतासु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैः ।

इति स्मरणात् । समावर्त्तनस्यापि विवाहात्प्राचीनसुतसंस्कारत्वाज्जीवत्पितृकस्य समावर्त्तने पिता स्वपितृभ्यो दद्यात् । अजीवत्पितृकस्तु पूर्वसंस्कृतभ्रातृसम्भवेऽपि स्वयमेव स्वपितृभ्यो दद्यात् । उपनीत्वा कर्म्माधिकारस्य जातत्वादिति ।

कर्त्ता चेज्जीवत्पिता तदा विशेषमाह शङ्खपरिभिष्टे ।

जीवत्पिता सुतसंस्कारेषु मातृमातामहयोः कुर्य्यात् तस्यां जीवन्त्यां मातामहस्यैवेति ।

येभ्य एव पिता दद्यादिति तु साग्निविषयम् ।

न जीवतः पितुः कुर्य्याच्छ्राद्धमग्निसुतो द्विजः ।
(ए)येभ्य एव पिता दद्यात्तेभ्यः कुर्व्वीत साग्निकः ॥
पितामहेऽप्येवमेव कुर्य्याज्जीवति साग्निकः ।
साग्निकोऽपि न कुर्व्वीत जीवति प्रपितामहे ॥

इति शातातपवचनात् ।

इति श्रीमद्विधानपारिजाते तृतीयस्तवके श्राद्धियाहनिर्णयः ।

अथ वरस्य कन्याग्रहं प्रति गमनविधानम् ।

तत्र यौनकः ।

पुष्ये मुहूर्त्ते कुर्व्वीत विवाहं विधिवद्द्विजः ।
तत्राभ्युदयिकं श्राद्धं कुर्य्यात् स्वस्ति च वाचयेत् ॥

अपरेद्युः कृतस्नानो धृतधौताम्बरद्वयः ।
भूषितो गन्धमाल्याद्यैः शकुनेन समन्वितः ॥
ब्राह्मणान् भोजयित्वान्ते कृतपुण्याहवाचनः ।
कृतकौतुकबन्धश्च मित्र(बन्धादि)बान्धवसंयुतः ॥
यानं यथार्हमारुह्य यातव्यं च बधूगृ(हे)हम् ।
तस्य द्वाराद्बहिः स्थित्वा प्राङ्मुखोऽभिमुखागतैः ॥
गृहीतपूर्णकुम्भादिपाणिभिर्वनिताजनैः ।
कृताभ्युद्गमनो गेहं प्रविशेत्सह बन्धुभिः ॥ इति ।

बधूवरभोजनविषये बौधायनः ।

स्नग्वी भुक्तवान् प्रतोदपाणिरपदातिर्गत्वा बन्धुज्ञातिभिरतिथिवदर्चितः स्नातामहतवाससं गन्धाङ्गुलिप्ता स्नग्विणीं भुक्तवतीमियुहस्ता बधूं समीक्षेत इति ।

व्यासोऽपि ।

भुक्ता* सपुष्पहस्तान्यां सावित्रीग्रहणं तथा ।
उपोषितः सुतां दद्यादर्चिताय द्विजातये ॥ इति ।

आश्वोऽपि ।

पूर्वेद्युः स्वस्तिवाचनं नान्दीश्राद्धं समाचरेत् ।
भुक्ता निश्शङ्कि पूर्वाह्णे उद्वहेदिमि सर्वदा ॥

इति कन्याग्रहगमनविधानम् ।

---

* भुक्तेति सपुष्पकैर्विभोजनपरमिति निर्णयसिन्धु ।

अथेदानीं गृह्यमागताय वराय कन्यादाना मधुपर्क-
विधानेन पूजा कार्या ।

तथा चाश्वलायनगृह्यम् ।

ऋत्विजो हत्वा मधुपर्कमाहरेत् स्नातकायोपस्थितायेति ।

कात्यायनगृह्यमपि ।

षडर्घ्या भवन्ति आचार्य ऋत्विग्वैवाह्यो राजा प्रियः
स्नातक इति ।

वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः ।

मधुपर्कः प्रदातव्योऽप्यन्यशाखेऽपि दातरि* ॥ इति ।

एवं स्वस्वसूत्रोक्तप्रकारेण मधुपर्कविधिना अर्चिताय वराय कन्या-
दानमभिधीयते ।

तथाच गौतमः ।

नानाविधा जानपदा ग्राम्याश्चोद्वाहकर्मणि ।
क्रियन्ते लौकिका धर्मास्तेषु स्वकुलपूरुषैः ॥
पूर्वैरनुष्ठितान् ज्ञात्वा कुर्यादारपरिग्रहम् ।
सर्वसाधारणं कर्म तत्तु तावदिहोच्यते ॥
तत्र प्रदेशे कस्मिंश्चित्तद्भूपरिकल्पिते ।
विष्टरं† प्राङ्मुखः सम्यगास्तिला चरणौ स्वयम् ॥

---

* अत्र वरदाग्रहणे ऋत्विगाचार्यपक्षकं वरद्वयं अन्यशाखया मधुपर्कं इति वर्णनेन वैवाह्यौ-
र्ध्यं तच्छाखया मधुपर्कं इति याज्ञिकास्तु नादियन्ते ग्रहम् । इति निर्णयसिन्धुः ।

† षडासना भवेद्विप्रा तदर्धेन तु विष्टरः ।
सार्धकेषु भवेद्विप्रा सप्तकेषु तु विष्टरः ।
दशविंशतयोर्विप्रा यज्ञावर्तेषु विष्टरः । एतेषामभावे मन्त्रैः ।

प्रक्षाल्याचम्य च कृतप्राणायामः समाहितः ।
उपलिप्य तथोल्लिख्य स्थण्डिलेऽग्निं निधाय च ॥
पश्चादग्नेः प्रतिष्ठाप्य पेषणीमश्मनिर्म्मिताम् ।
प्रागुत्तरेऽग्ने संस्थाप्य पूर्णकुम्भमथो वरः ॥
उत्थाय प्राङ्मुखः स्थित्वा प्रत्यगुत्तरतोऽनलात् ।
तदानीमात्मना दत्तं नूतनं वस्त्रयुग्मकम् ॥
वसित्वाचान्तसलिलां भूषितां कुसुमादिभिः ।
पश्चागतकुशको ब्रह्मा तदर्द्धेन तु विष्टरः ॥
ऊर्द्धकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥
प्रत्यङ्मुखः प्राङ्मुखीं तां स्थितामात्मसमीपतः ।
कन्यका प्रतिगृह्णीयाद्दत्तां पित्रादिभिर्वरः ॥
कन्यादानप्रकारस्य पूर्व्वाचरित उच्यते ।
वरस्याभिमुखं स्थित्वा कन्यायाः प्रतिपादकः ॥
चतुर्थ्यन्तं वरस्योक्त्वा नाम तद्गोत्रपूर्व्वकम् ।
ततः सद्वत्सकर्म्मभ्य इत्युच्चार्य्य ततः परम् ॥
पाद(गामिनि,गामिति चोच्चार्य्य प्रीतिपूर्व्वं ततः परम् ।
वरस्य हस्ते यो दद्याद्वेतोयेन शास्त्रधीः ॥
तद्यथा गार्ग्यगोत्राय परमेश्वरशर्म्मणे ।
याचेयगोत्रप्रभवां पार्व्वतीं प्रददाम्यहम् ॥
कन्यां सद्वत्सकर्म्मभ्यः करोमि प्रतिपादिताम् ।
कन्यकादानकर्म्मैवमाचरन्ति मनीषिणः ॥

विभवानुगुणं पात्रं सुवर्णरजतादिकम् ।
सर्व्वं विहित(मन्त्रेण)मत्रैव काले दद्यात्सहोदकम् ॥

तिष्ठन् कन्यादानं कुर्य्यात् । तदुक्तं हरिहरसतिना ।

चतुष्पादं गृहं कन्यां दासीं छत्रं रथं तथा ।
तिष्ठन्नेतान् द्विजो दद्याद्भूम्यादीनुपविश्य च ॥
ततो मङ्गलसूक्तञ्च ध्यायन्निष्टाञ्च देवताम् ।
बद्ध्वा कण्ठे प्रदेयैःस्वा भूषणानि च शक्तितः ।
कन्यकां प्रतिगृह्णीयं वरः पूर्व्ववदासने ॥ इति ।

अत्र गौनकीये अग्निं प्रतिष्ठाप्य बध्वा वरः पाणिं गृह्णीयादिति यदुक्तं तत्तु वाजसनेयादिविषयम् । तच्छाखाप्रवर्त्तककात्यायनाचार्य्येण उद्वाहोक्तिते अग्निमुपसमाधाय निर्म्मथ्य विवाहं उदगयन आपूर्य्यमाणपक्षे कुमार्य्याः पाणिं गृह्णीयादिति सूत्रप्रणयनात् । आश्वलायनादीनान्तु पाणिग्रहणानन्तरमग्निस्थापनं वेदितव्यम् । पश्चादग्नेरैषदश्मानं प्रतिष्ठाप्य उत्तरपुरस्तादुदकुम्भं निधाय समन्वारब्धायां हुत्वेति सूत्रात् ।

आत्मनो दक्षिणे पार्श्वे वधूं तामुपवेश्य च ।
उपलेपादि कुर्व्वीत हविर्भुक्स्थापनान्तकम् ॥

इति कारिकाकारमतञ्च ।

नारदः ।

षडङ्गुलमितोत्सेधं द्वादशाङ्गुलमायतम् ।
कुर्य्यात्पातालपक्वताम्रपात्रं तदर्द्धमिः पलैः ॥
ताम्रपात्रे जलैः पूर्णे सत्पात्रे वाथवा शुभे ।

मण्डलादौदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्*।
मुहूर्त्तं मङ्गले प्राज्ञो यत्रेच्छायादिनाथवा॥ इति।

अत्र मुमुहूर्त्तसमये विशेषोऽभिहित आश्वलायनकारिकायाम्।

स्नातालङ्कृतकन्यायाः प्राङ्मुख्याः प्रत्यगाननः।
ईक्षेत तण्डुलस्थाया वरस्तस्य मुखञ्च सा॥
मुहूर्त्तं शोभने सम्यक् क्षिपेता मुखयोर्मिथः।
सगुड़ा जोरकां कन्यां वरयेदथ तां वरः॥ इति।

तण्डुलप्रमाणमुक्तं यमस्मृतौ।

आरुह्य तण्डुलप्रस्थमीक्षेत्प्रत्यङ्मुखो वधूम्। इति।

अत्र कन्यादानप्रकार उक्तः गृह्यपरिशिष्टे। यथा।

चतु(प्यादे)प्पदे सोत्तरच्छदे हरितदर्भास्तीर्णे भद्रपीठे वरः प्राङ्मुख उपविशेत्तस्य पुरस्तात् प्रत्यङ्मुखीं भद्रपीठासीनां सुस्नातामलङ्कृतामाहतवाससम्† सवर्णां कन्या पुरस्कृत्य दाता सामात्य-उपविशेद्वरं विधिवद(र्हयेत्)भ्यर्चयेच्च। अथ दक्षिणतः पुरोधा उदङ्मुख उपविश्य मध्ये प्रागग्रोदगग्रान् दर्भानास्तीर्य तैजसमपां पूर्णं कलसं निधाय प्रोक्षियवानीय तं गन्धादिभिरलङ्कृत्य दूर्व्वा(स्व)पल्लवैर्मुखमवस्तीर्य्य अव्लिङ्गाभिर्गृणिरभिमन्त्र्य ताभिरद्भिः प्रयोजयेत्।

---

* निक्षेपमन्त्रो यथा— सुखं त्वमसि यन्नाम्ना ब्रह्मणा निर्म्मितं पुरा।
भव भावाय दम्पत्योः कालसाधनकारणम्॥ इति निर्णयसिन्धु।

† आहतवाससोलक्षणं यथा—ईषद्धौतं नवं शुभ्रं सूक्ष्मं यन्न धारितम्।
आहतं तद्विजानीयात् सर्व्वकर्म्मसु पावनम्॥
ईषत् सूक्ष्मं, न धारितं न परिहितमिति सत्कारतत्त्वम्।

अथ दाता पुण्याहादीनि वाचयित्वा शिवा आपः मन्तु सौमनस्यमस्तु अक्षतं चारिष्टञ्चास्तु दीर्घमायुरस्तु शान्तिः पुष्टिस्तुष्टिरास्तु तिथिकरणमुहूर्तनक्षत्रसम्पदास्तु इत्युक्त्वा भार्यादिममेतः सङ्ख्याकामुकार्थं कन्या प्रतिरूपा यशसगोत्रो(त्रा)त्पन्नामसुष्य प्रपौत्रीं मसुष्य पौत्रीमसुष्य पुत्रीं सुशीलानाम्नीमिमां कन्यां वशिष्ठगोत्रो-(त्राय)ऽत्राय अमुष्य प्रपौत्राय अमुष्य पौत्राय अमुष्य पुत्राय सुशीलनाम्ने अमुं वराय सम्प्रदे कन्या प्रतिरूपास्तु भवानिति ब्रुवन् वरस्य पाणौ हिरण्यमुपधाय कलसोदकधारामासिञ्चेत्। मनसा च प्रजापतिं प्रीयतामिति ब्रूयात्।

अथ वरः शिरसि पुण्याहाशिषो वाचयित्वा दक्षिणेऽक्षे कन्यामभिहृत्य "क इदं कस्मा अदात् काम कामायादात् कामो दाता काम प्रतिग्रहीता काम समुद्रमाविश काम त्वा प्रतिगृह्णामि कामैतत्ते हृदिरसि द्यौस्त्वाददातु पृथिवी परिगृह्णातु" इति जपित्वा प्रजापतिमनुस्मृत्य धर्मप्रजासिद्ध्यर्थं कन्या प्रतिगृह्णामीति ब्रूयात्। एवं विः प्रयुज्य पुरोधा दारवरौ प्रति 'ऋतस्य हि शुरुध सन्ति पूर्वी'रिति तिस्र ऋचोः जपित्वा एतद् सत्यमशुद्धमस्तु इति ब्रूयात्।

---

* ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्बृहतीरनूषत।
ऋतस्य श्लोको बधिरा ततर्द कर्णावुदारः सुभगस्य यामनि॥ ८॥
ऋतस्य दृळ्हा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि।
ऋतेन दीर्घमिषणन्त पृक्ष ऋतेन वाजं जरणामियर्ति॥ ९॥
ऋतं यतानमृतमिद्नीयतस्य शुष्मात्तुरया च गव्युः।
ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते॥ ऋग्० २।२८।१०।ऋक्०।

अथानशौर्निरीक्षणम् ।

खलङ्कृते वेश्मनि मङ्गलगीततूर्य्यनिर्घोषे पूर्व्वापराव(न्यु)त्युच्छ्रितौ हस्तान्तरालौ शुक्लतण्डुनरागौ कृत्वा मध्ये स्थण्डिका तिरस्करिणी धारयेयुः । अथ पूर्व्वस्मिन् रागौ प्रत्यङ्मुखौ गुडजोरकपाणिं कन्यां स्थापयेयुः । अपरस्मिन् प्राङ्मुखं तथाभूतं वरञ्च । तौ मनसा इष्टदेवता ध्यायन्तौ समाहितौ (समायिकौ) तिष्ठेताम् । ब्राह्मणाः सूर्य्यसूक्तं* पठेयुः । पुरन्ध्रयो मङ्गलगीतीः कुर्य्युः ।

अथ ज्योतिर्व्विदादिष्टे काले (प्रविष्टे) सद्यस्तिरस्करिणीमुद्गमयेयुः कन्यावरौ परस्परस्मिन् गुडजोरकौ(नवकिरतः)नवकिरन्तौ परस्पर निरीक्षेयाताम् । अभ्रातघ्नीमिति† तामोक्षमाणौ जपत्यघोरचक्षुरपतिघ्नेधीति‡ । तथेक्ष(क्ष्य)माणोऽथास्या भ्रुवोर्मध्यम् इदमहमिति§ दर्भाग्रेण परिमृज्य दर्भं निरस्य अप उपस्पृशेत् । ततो मित्रोऽसीति वधूं दक्षिणहस्ते गृहीत्वा एकमिषेति वेदिमुपनयेत् । अथ ब्राह्मणा बान्धवाः पुरन्ध्रयश्च तावाशीर्भिरभिनन्देयुः ।

---

* उदुत्यमित्यादिक प्रथमखण्डस्य ४०७ पृष्ठे प्रदर्शितम् ।

† अभ्रातघ्नीं वरुणापतिघ्नीं इहस्थां इन्द्राणीमनसूयामहं सर्वे ।

‡ अघोरचक्षुरपतिघ्नेधि शिवा पशुभ्य सुमना सुवर्चा ।
वीरसूर्देवकामा स्योना श नो भव द्विपदे श चतुष्पदे ॥ १०म ८५सू ४४मन्त्र ।

§ इदमहं या त्वयि पतिघ्नमसौम्यं निर्दहामि ।

¶ एकमिषे विष्णुस्त्वान्वेतु ३ ऊर्ज्जे द्वौ व्रताय विष्णुस्त्वान्वेतु । सत्यारम्भणमसि ।

अथानयोरार्द्राक्षतारोपणम् ।

ब्राह्मणाः तैजसेन पात्रेण क्षीर(मानीय)मादाय घृतमासिच्य पुरश्चरणादिभिः आर्द्राक्षतताण्डुलानादाय तदारोपणरूप तथास्थितयोर्वधूवरयोर्वदनकमेतत् कारयेयुः । * अमृतं क्षीरमायुर्घृतमरिष्टमक्षतान्याप एतेषामारोपणमिष्यते इति सूत्रात् । ततो वरः प्रक्षालितपाणिर्मध्वाः प्रक्षालितोऽञ्जली क्षीरघृतं पाणिना हिरण्यस्तोर्य्य हिरण्यताण्डुलानञ्जलिना वपति यथापूर्यते ततो हिरण्यपरिष्टाद्भिधारयति एव वराञ्जलावन्यस्ताण्डुलापूरणं कुर्य्यात् । दाता तयोरञ्जल्योर्हिरण्यमवदधाति । अथ वरः कन्याञ्जली स्वाञ्जलिं धारयेत् दाता च कन्या धारयतु दक्षिणाः पान्तु बहुदेय चास्तु पुण्यं वर्द्धताम् शान्तिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्त्तनक्षत्रमभ्यदस्तु इत्युक्त्वा कन्यामुत्थाप्य तदञ्जल्यक्षतान् वरमूर्द्ध्नारोपयेत् । वरोऽपि तन्मूर्द्ध्नि स्वाञ्जल्यक्षतानारोपयेत् । एवं त्रिर्वधूः पूर्व्वं वराञ्जली ततस्त्रिर्वरः वध्वञ्जली तण्डुलपूरण कुर्य्यात् । तदञ्जलावन्योऽप्य तत्तमारोपणं कारयेत् । इदानीं दाता वराय गोभूमिदासीयानभयनानादिकमनुदानं दद्यात् ।

अथ पुरोधाः काम्से (पय) आप आसिच्य औदुम्बर्य्या आर्द्रशाखया सपलाशया सहिरण्यपवित्रया सदूर्व्वाम्रपल्लवया अभिषिञ्चेदञ्जलिङ्गाभिर्दृष्टिभि * ।

---

* आपो हि ष्ठा मयोभुव इत्यादिकाभि, प्रथमखण्डस्य ५८ पृष्ठे प्रदर्शिताभि ।

अथ वधूवरौ स्वग्रीखरपुष्पं घोरघृतेनाघ्राय परस्परतिलकं कुरुतः कण्ठे स्रजं चामुञ्चतः कौतुकसूत्रं च परस्परं करे बध्नीयातां। अथ पुरोधास्तयोरुत्तरीयान्तयोः पञ्च पञ्च पू(गी)गफलानि विवाहव्रतरक्षिणं गणाधिपमनुस्मृत्य गणानां त्वा गणपतिं हवामहे* इति आ तू न इन्द्र शुमन्तमिति च† वधूवरयोरुत्तरीयान्ती च नीललोहितं भवतीति‡ मन्त्रेण बध्नीयात्।

अथ दाता सभार्यो हृदाः पुरन्ध्रयो ज्ञातिबान्धवाश्च क्रमादाशीर्भिरार्द्रोक्षतारोपणं कुर्युरिति।

अत्र कन्यानिरीक्षणदानादिषु शौनकगृह्यपरिशिष्टयोः क्रमव्यत्ययो यत्र दृश्यते तत्र शिष्टाः प्रमाणम्।

अत्र कन्यादानमन्त्रो वायुपुराणे यथा।

कन्यां कनकसम्पन्नां कनकाभरणैर्युताम्।
दास्यामि (विष्णवे) विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥
विश्वभ्र(रः)रा सर्व्वभूताः साक्षिणः सर्व्वदेवताः।
इमां कन्यां प्रदास्यामि पितॄणां तारणाय च॥

---

* गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे। निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्।
२३५. १८म. यजुः।

† आ तू न इन्द्र शुमन्त चित्र ग्राम संग्रभाय।
महाहस्ती दक्षिणेन॥ ऋग्. ८।१. १क्ष्क्.।

‡ नीललोहित भवति कृत्यासक्तिर्व्यज्यते।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते॥ १०म. ८५सू. ९८ऋक्.।

अथ प्रार्थनामन्त्रौ ।

ऋष्यशृङ्गः ।

गौरीं* कन्यामिमां विप्र यथाशक्तिविभूषिताम् ।
गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रय ॥

व्यासोऽपि ।

कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः ।
कन्ये मे पृष्ठतो भूयास्त्वदानान्मोक्षमाप्नुयाम् ॥ इति ।
दासीदासासनाद्यञ्च भूषणानि गृहं (ततः) तथा ।
चित्राणि च धनञ्चापि तथान्यानि प्रदापयेत् ॥
इति विवाहोत्तरमनुदानान्युक्तानि ।

अथ कन्यादानाङ्गभूतानुदानमन्त्राः प्रोच्यन्ते ।

यज्ञसाधनभूता या विश्वस्याघप्रणाशनी† ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

इति गोः ।

सर्व्वस्यस्याश्रया(या)यो भूमिर्वराहेण समुद्धृता ।
अनन्तस्यफलदा अतः शान्तिं प्रयच्छ मे ॥

इति भूमेः ।

इयं दासी मया तुभ्यं श्रोविप्र प्रतिपादिता ।
सदा कर्म्मकरी भोग्या यथेष्टं भद्रमस्तु ते ॥

---

* अनन्तार्णिका तु गौरीमित्यादिपदस्थाने मयेति निर्देशकीयम्, अधिकवार्णिका च रोहिणीत्यादिरूपं कार्य्य इति गोपीनाथ ।

† अघप्रणाशनी इत्यत्र अघौघनाशिनी इति सौकारत्नमालायां पाठः ।

इति दासाः।

विष्णुस्त्वमग्निरूपेण यस्मादमृतसम्भवः।
चन्द्रार्कवाङ्(ग्नी)नं नित्यमतः शान्तिं प्रयच्छ मे॥

इत्यग्नस्य।

अशून्यं शयनं यस्मादनूनां श्रियमुद्वहन्।
सौभाग्यं देहि मे नित्यं शय्यादानेन केशव॥

इति शय्यायाः।

हिरण्यगर्भसम्भूतं मोक्षणं चाङ्गुलीयकम्।
सर्व्वप्रदं प्रदास्यामि प्रीणातु कमलापतिः॥

इत्यङ्गुरीयकस्य।

क्षीरोदमथने पूर्व्वमुत्थितं कुण्डलद्वयम्।
श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति॥

इति कुण्डलस्य।

इदं गृहं गृहाण त्वं सर्व्वोपस्करसंयुतम्।
तव विप्र प्रसादेन ममास्त्वभिमतं फलम्॥

इति गृहस्य।

अत्र विभवे सति अन्यान्यपि दातव्यानि तन्मात्तु चतुर्थ-स्तवके वक्ष्यन्ते।

कन्यादानफलमुक्तं ब्राह्मे।

कन्यान्तु परया भक्त्या ह्यलङ्कृत्य प्रयत्नतः।
कुलीनाय सुरूपाय गुणज्ञाय विशेषतः।
कन्यां वरयमाणाय दद्यादेष विधिः स्मृतः॥

लैङ्गेऽपि ।

कन्यादानं प्रवक्ष्यामि सर्व्वदानोत्तमोत्तमम् ।
यद्दत्त्वा सर्व्वदानानां फलं प्राप्नोति मानवः ॥
महीदातुश्च गोदातुः कन्यादातुश्च ये तथा ।
कन्यादानानुगाः पश्चात् समं यान्ति त्रयो रथाः ॥

हरिवंशेऽपि ।

सहस्रमेव धेनूनां शतं चा(नु)नड्वहां समम् ।
दशानड्वत्समं यानं दशयानसमो हयः ॥
दशवाजिसमा कन्या भूमिदानं (च) न तत्समम् ।
तस्मात्सर्व्वप्रदानेभ्यः कन्यादानं विशिष्यते ॥

मनुरपि ।

अग्निहोत्रादिभिर्यत्स्याद्दीक्षातो ब्राह्मणस्य च ।
तत्कन्यां विधिवद्दत्त्वा फलमाप्नोति मानवः ॥

स्कान्देऽपि ।

वैवाहिकप्रदानं (यो) वा यो दद्यात्त नरोत्तमः ।
विमानेन विचित्रेण किङ्किणीजालमालिना ।
महेन्द्रभवनं याति वीज्यमानोऽप्सरोगणैः ॥

संवर्त्तोऽपि ।

अलङ्कृत्य तु यः कन्यां भूषणाच्छादनादिभिः ।
दद्यात्स्वर्गं (स चा) समाप्नोति पूज्यते वासवादिभिः ॥
भूभुद(भूपद)श्वमेधी च प्राणदाता भवेत्तु च ।
समं यान्ति रथा येषां त्रयो वै नात्र संशयः ॥

कूकुदः (कूपद) इति सालङ्कारकन्यादातित्यर्थः । सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद (कूपद) इत्यभिधानात् ।

आग्नेयेऽपि ।

कन्यां ये तु प्रयच्छन्ति यथाशक्ति स्वलङ्कृताम् ।
ब्रह्मदेयां द्विजश्रेष्ठ ब्रह्मलोकं व्रजन्ति ते ॥
श्रुत्वा कन्याप्रदानञ्च पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
तिलराशिः कृतो यावद्दिवाकरसमुच्छ्रितः ।
वर्षान्ते रटन्ति तस्य तिलो राशिषु यावता ।
संक्षयं लभते* तावद्ब्रह्मलोकोऽस्य निश्चितम् ॥
यावन्ति सन्ति रोमाणि कन्यायाश्च तनौ पुनः ।
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते† ॥ इति ।

अत्रिः ।

बालुकाभिः कृतो राशिर्यावत् सर्षपिमण्डलम् ।
गते लयसहस्रे‡ तु एकमेकं विशीर्य्यते ।
क्षयञ्च दृष्टस्तस्यापि कन्यादानै न विद्यते§ ॥

---

* न क्षयं लभते इति पाठे युक्तमुत्पश्यामः ।

† महीयते इति पदद्वयमिति क्वाचित्, एकपदत्वे तु महीयते इति रूपं स्यात् ।

‡ लया प्रलया कल्पान्ता इत्यर्थः तेषां सहस्रं तस्मिन् ।

§ कन्यादानजन्यपुण्यस्येति शेषः ।

संवर्त्तसु ।

ज्योतिष्टोमातिरात्राणां यतं शतगुणोद्धृतम् ।
प्राप्नोति कन्यकां दत्त्वा होममन्त्रैश्च संस्कृताम् ॥ इति ।

अथ दम्पतिकर्त्तव्यमुच्यते ।

यदाह कात्यायनः ।

सवर्णायास्तथा पाणिं गृहीत्वा विधिवद्वरः ।
संपूज्य प्रार्थयित्वा तां शचीं देवीं गुणाश्रयाम् ॥
त्रैलोक्यवल्लभां दिव्यगन्धमाल्याम्बरा(द्वि)न्विताम् ।
सर्व्वलक्षणसंयुक्तां सर्व्वाभरणभूषिताम् ।
विलासिनोमहस्रौघैः सेव्यमानामहर्निशम् ॥
एवविधां कुमारीन्तु पूजान्ते प्रार्थयेत्ततः ।
कात्यायनीञ्च पद्माञ्च गौरीमेवं प्रपूजयेत् ॥ इति ।

एवं गौरीं संपूज्य वरो मङ्गलसूत्रं वधूकण्ठे स्वेष्टदेवतां ध्या(त्वा)यन् बध्नीयात् ।

तत्र मन्त्रः स्मृतिरत्ने ।

माङ्गल्यतन्तुनानेन भर्त्तृजीवनहेतुना ।
कण्ठे बध्नामि सुभगे सा जीव शरदः शतम् ॥ इति ।

अस्मिन् समये वरो वधूं स्वकीयवस्त्रालङ्कारभूषणैर्भूषयित्वा पूर्व्वोक्तां विवाहवेदिकामागत्य स्वयमासनमध्यास्य पश्चिममार्गेण नियमितयाचं वधूमानीय दक्षिणतस्तामुपवेश्य स्वस्वशाखोक्तमार्गेण विवाहहोमं कुर्य्यात् ।

तथाचाश्वलायन ।

अहोरात्रे व्यतीते तु परेद्युः प्रातरेव हि ।
गृह्यप्रवेशनीयः स्यादिति यज्ञविदो विदुः ॥ इति ।

अत्र व्रतविशेषमाह शौनकः ।

अत ऊर्ध्वं त्रिरात्रं तौ द्वादशाहमथापि वा ।
अग्निं वोह्य तथाऽऽदित्य चरेता दम्पती व्रतम् ॥

व्रतमाह स एव ।

अक्षारलवणाहारौ भवेता भूतले तथा ।
अयोयाता समावेशं न कुर्यातां वधूवरौ ॥

समावेशो मैथुनम् ।

व्रते समाप्ते बध्वा च विवाहसमये धृतम् ।
वस्त्रं प्रदद्यात्तत्तस्मै ब्राह्मणाय विपश्चिते ॥
सूर्यानाग्नीर्कचो*ऽध्येति शब्दार्थस्वरतश्च यः ।

---

* सूर्या ऋक्षस्त्रिमन्त्राका । यथा—

सूर्यायै पश्यिता भूमि सूर्यक पश्यिता दो ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः ॥ १ ॥
सोमेनादित्या बलिन सोमेन पृथिवी महो ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥ २ ॥
सोमं मन्यते पपिवान् यत् सम्पिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ ३ ॥
आच्छिद्यानेनुपितो भवति सोम रचित ।
यादृस्तादिच्छूतस्तिष्ठसि न ते अश्नाति पार्थिव ॥ ४ ॥
यस्ता देव प्रयिमति तत आप्यायसे पुनः ।
वायु सोमस्य रक्षिता समानां मास आकृति ॥ ५ ॥

सत्येनोत्तभिता०इत्याद्यामृचमारभ्य या ऋचः ॥

वैश्वानरोदनुदेयी सारायणी श्वोवसी ।
सूर्याया अग्निर्वासो गायत्रेति परिष्कृतम् ॥ ६ ॥
त्रिणिरा उपबर्हणं चक्षुरा अभवन्मम ।
द्यौर्भूमि कोश आसीद्यदयात् सूर्यापतिम् ॥ ७ ॥
सोमो आसन् प्रतिधय ऋक्तीर हन्द ओपश ।
सूर्याया अश्विना वराग्निरासीत् पुरोगवः ॥ ८ ॥
सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्या यत्पत्ये शंसन्तीं मनसा सविमादहात् ॥ ९ ॥
मनो अस्या अन आसीद्द्यौरासीदुत छदिः ।
शुक्रावनड्वाहावास्तां यदयात् सूर्या गृहम् ॥ १० ॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनाविति ।
एत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥ ११ ॥
द्यावो ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनोमय सूर्यारोहत् प्रयती पतिम् ॥ १२ ॥
सूर्यायै वहतुः प्रागात् सविता यमवासृजत् ।
अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ॥ १३ ॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद्वामजानन् पुत्रः पितरावरुरोह पूषा ॥ १४ ॥
यदयातं शुभस्पती वरेयं सूर्यामुप ।
कीदृङ् रथ आसीत् क इदाय तस्थतुः ॥ १५ ॥
द्यौस्ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैक चक्रं यद्गुहा तदद्वातय इदिदुः ॥ १६ ॥
सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥ १७ ॥
पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम् ।
विश्वान्यो भुवनाभिचष्ट ऋतूरन्यो विदधज्जायते पुनः ॥ १८ ॥

विहिसो तोरक्षच्च(क्षं)स नेन्द्रमित्याद्यथो पुरा ।
अग्नीरात्मा देवोद्यन्ते सूर्य्याशब्देन सूरिभिः ।
ब्राह्मणान् भोजयित्वा तैः पुण्याहमय वाचयेत् ॥ इति ।

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भाग देवेभ्यो वि दधात्ययन् प्र चन्द्रमास्तिरत दीर्घमायु ॥ १८ ॥
सुकिंशुक शल्मलि विश्वरूप हिरण्यवर्ण सुवृत सुचक्रम् ।
आरोह सूर्य्य अमृतस्य लोक स्योन पत्ये वहतु कृणुष्व ॥ १० ॥
उदीर्घात पतिवती हेवा विश्वावसु नमसा गीर्भिरीडे ।
अन्यामिच्छ पितृषद व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥ २१ ॥
उदीर्घातो विश्वावसो नमसेडामहे त्वा ।
अन्यामिच्छ प्रपर्व्या स जाया पत्या कृज ॥ २२ ॥
अनृक्षरा ऋजव सन्तु पन्था येभि सखायो यन्ति नो वरेयम् ।
समर्य्यमा स भगो नो निनीयात् स जास्पत्य सुयममस्तु देवा ॥ २३ ॥
प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात् सविता सुशेव ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥ २४ ॥
प्रेता मुञ्चामि नामुत सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्व सुपुत्रा सुभगासति ॥ २५ ॥
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथ मा वदासि ॥ २६ ॥
इह प्रिय प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं संसृजस्वाधा जिव्री विदथ मा वदाथ ॥ २७ ॥
नीललोहित भवति कृत्यासक्तिरेज्यते ।
एधन्ते अस्या ज्ञातय पतिर्बन्धेषु बध्यते ॥ २८ ॥
परा देहि शामुल्य ब्रह्मभ्यो विभजा वसु ।
कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥ २९ ॥
अघोरा चक्षुर्मघवति सुशेवा पतिघ्न्यनुमती स्योना ।
पतिभ्यो जाया शग्मा शमस्मै सर्वमिज्जनेभ्यो गवे चाश्वाय च ॥ ३० ॥ अनुवा. १० सूक्त १० ऋक्.

अत्र चतुर्षु दिवसेषु कर्त्तव्यविशेषमाह स एव ।

दम्पती रोहिणीसोमौ भूत्वा प्रथमके दिने ।
दाक्षायणीं यजेयातां द्वितीये दिवसेऽपि तौ ॥
पूजयेतां महादेवीं गन्धर्वाप्सरसौ च तौ ।
अग्निस्वाहे तृतीयेऽह्नि पूजयेतान्तु कालिकाम् ।
चतुर्थ्यां तौ यजेयातां शाङ्करीं मानवस्त्रियौ ॥
एवं प्रतिदिनं (कर्त्तुं) कृत्वा पूजां तौ दम्पती तथा ।
चतुर्थ्यन्तेषु दिवसेष्वर्चयेद्ब्राह्मणान् बहून्* ॥
वस्त्रहेमादिमिष्टान्नं ताम्बूलादि प्रयत्नतः ।
आशीर्व्वादैर्बहुविधैस्तुष्टैर्दत्तैर्द्विजैः ॥

अत्र दम्पतिसहभोजने संग्रहकारः ।

माचा सहोपनीतं स्याद्विवाहे भार्य्यया सह ।
अन्यत्र सह (भुञ्जीत) भुञ्जानः पातित्यं प्राप्नुयान्नरः ॥

तथा नान्दीश्राद्धमारभ्य मातृकाविसर्জ্জनावधि वर्ज्यमुक्तं संग्रहे ।

नित्यश्राद्धमध्ययनं स्नानं शौचेन वारिणा ।
जाते माङ्गलिके नैव मण्डपोद्वासनावधि ॥

हरिवंशः ।

अपसव्यं स्वधा(पात्रं)कारं शौचाद्यैः स्नानमेव च ।
सपिण्डा नैव कुर्व्वीरन् यावन्मातृविसर्জ্জनम् ॥

ये वा भद्रं दूषयन्ति स्वधाभिरिति मन्त्रलिङ्गाच्च नित्यश्राद्धादौ स्वधाकारनिषेधः ।

---

* अत्रेदानीं द्विजान् बहून् इति पाठो युक्तः, कर्त्तुरिच्छानुसारतः ।

विवाहसमये प्राप्ते यद्येषां मृ(त)च्युजन्मनो ।
स्याता तदा पुनर्वेव शुद्धे काले समाचरेत् ॥

इति वचनाच्च ।

केचित्तु वरणावरिनय्य गुरुमृताशौचविषयमेतत् अन्यत्र सामान्याशौचे नान्दीश्राद्धादूर्द्धमाशौचाभावादित्याहुः ।

तस्य दोषस्य शान्त्यर्थं पुनर्वेवाह्यमिष्यते ।
अयन चोत्तर श्रेष्ठ हृदये तु* विशेषतः ।
आषाढमार्गशीर्षौ द्वौ वर्ज्यौ शेषा. शुभावहाः ॥
विवाहोक्तर्क्षतिथ्यम्बराशिवारादिवर्गजाः ।
करणयोगमन्त्राणि ग्रहगोचरयोगगाः ॥
तस्मिन् (वो विवाहसमये शुभमग्र तथैव च ।
पूर्व्वोह्णे पूर्व्वरात्रे च विवाहः शुभदो भवेत् ॥ इति ।

अत्रयोऽन्यो विशेष सगोत्रादिविवाहप्रायश्चित्तविधाने द्रष्टव्यः ।

अथ द्वितीयविवाहविधानम् ।

तत्र श्रुतिर्यथा ।

तस्मादेको बह्वीर्जाया वि(न्दे)न्दत इति ।

स्मृत्यन्तरमपि ।

तस्मादेकस्य बह्वो जाया भवन्ति नैकस्यै बहवः सहपतय इति ।

---

* अत्रैवशु विशेषत इति ग पुस्तके पाठ ।

तद्विषयमाह आपस्तम्बः।

धर्मप्रजासम्पन्ने दारे* नान्यां कुर्वीत अन्यतराभावे कार्य्या प्रागग्न्याधानादिति† ।

अस्यार्थः। यदि प्रागूढा स्त्री धर्मेण प्रजया च सम्पन्ना तदा नान्यां विवहेत्। अन्यतराभावे अग्न्याधानात् प्राग्वोढव्या इति। जन्मना ह वै पुरुषस्त्रिभिर्ऋणवान् जायते इति नापुत्रस्य लोकोऽस्तीति च श्रुतेः।

स्मृतिश्च।

अपुत्रः सन् पुनर्दारान् परिणीय ततः पुनः।
परिणीय समुत्पाद्य नो चेदापुत्रदर्शनात्।
विरक्तश्चेदनं गच्छेत् संन्यासं वा समाश्रयेत्॥

---

* अत्र दारे सतीति वचनान्मृते तस्मिन् प्रागूढ्वाधानात् सत्यामपि पुत्रसम्पत्तौ धर्मेसम्पत्तये पुनर्दारपरिग्रहः कर्त्तव्यः।

तथाच मनुः।

भार्य्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्म्मणि।
पुनर्दारक्रियां कुर्य्यात् पुनराधानमेव च॥

याज्ञवल्क्योऽपि।

आहरेद्विधिवद्दारानग्नीनेवादिलक्षयन्। इति गोपीनाथः।

† प्रागग्न्याधानात् सत्यामपि धर्मप्रजासम्पत्तौ रागाक्रान्तस्य कदाचिद्दारग्रहणे भावेव दोषः। यथाहिताग्नेर्भार्य्या कर्म्मसु श्रद्दधाना मत्ता वा न भवति पुत्राय सुता अनुत्पन्ना वा तदा कर्त्तव्य एव विवाह इति व्याख्यातमुम्बलाचार्य्यैः।

याज्ञवल्क्यः ।

सुरापी* व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूत्याधिवेत्तव्या पुरुषद्वेषिणी तथा ।
अधिविन्नापि भर्त्तव्या महदेनोऽन्यथा भवेत् ॥

अधिवेत्तव्या तदुपरि स्त्र्यन्तरं कर्त्तव्यमित्यर्थः ।

अधिवेदने प्रतीक्ष्यकालमाह मनुः ।

वन्ध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

संग्रहे तु ।

अप्रजा दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्† ।
मृतप्रजा पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥ इति ।

स्मृतिभास्करेऽपि ।

व्याधिता स्त्रीप्रजा वन्ध्या उन्मत्ता विगतार्त्तवा ।
अदुष्टा लभते त्यागं तीर्थतो न तु धर्म्मतः ॥

तीर्थतो योनितः । धर्म्मकार्य्ये तु सहायभूता भवत्येव ।

सहितायां विशेषमाह स एव ।

या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः ।
सानुज्ञाप्याधिवेत्तव्या नावमान्या तु कर्हिचित् ॥ इति ।

---

* सुरापीति स्त्र्यधिवेदनमात्र किन्तु त्यागोऽपि "तथा मद्यति पातके" इति त्यागहेतुत्वेन तस्य पुनरभिधानात्, "पतत्यद्यौ मरौरस्य यस्य भार्या सुरां पिबेत्" इति वचनात् ।

† अन्यैरधिविन्देत् न तु भोग्यमन्यैरिति माधवः ।

स्मृत्यन्तरेऽपि ।

एकामुत्क्रम्य कामार्थमन्यां (लब्धुं) वोढुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्वोढ़ामपरां वहेत् ॥

याज्ञवल्क्यस्तु ।

आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियै ॥ इति ।

सधनेन स्वद्रव्यतृतीयांशो देयः । निर्धनेन अन्नाच्छादनादि देयमित्यर्थः ।

या तु उक्तद्रव्यापरितोषादिना गृहान्निर्गच्छेत् तां प्रत्याह मनुः ।

अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा* कुलसन्निधौ ॥ इति ।

पत्नीबहुत्वे विशेषमाह कात्यायनः ।

अग्निशुश्रूषणे यज्ञे बहुभार्यः सवर्णया ।
कारयेत्तद्बहुत्वं चेज्ज्येष्ठया गर्हिता न चेत् ॥ इति ।

अस्यार्थः । अग्निशुश्रूषा यौतपार्त्ताग्निसाध्यकर्म । यज्ञः श्रौतस्मार्त्ताग्निसाध्यकर्म । इष्टशुश्रूषा अतिथिपूजादिका । पत्नीसहायसम्पाद्यं यत्तदेतत् सर्वं सवर्णासवर्णभार्यासमुदायवान् सवर्णभार्यया कारयेत् । अनेकसवर्णभार्यायुक्तस्तु ज्येष्ठया सवर्णया कारयेत् यदि सा गर्हिता

---

* त्याज्या वा इत्यत्र न त्याज्या इति सम्प्रदायमाश्रित्य पाठः, स एव समीचीनतया प्रतिभाति ।

न स्यात्। गर्हाशब्दोऽत्र धर्म्मायोग्यत्वोपपादकदोषोपलक्षकः। ते च दोषा अन्धत्वकुष्ठित्वादयः।

इदमग्न्याधा(न)ने सहाधिकृतानेकभार्य्याविषयम्। अनधिकृतायास्तु प्रसक्त्यभाव एव। तत्रापि केवलक्रत्वर्थमाज्यावेक्षणादि यजमानीदुम्बरीसमानवदेकयैव सवर्णया ज्येष्ठया कारयेत्। पत्नीसन्नहनादिकं कर्त्तुः संस्कारन्तु सहाधिकृताभिः सर्व्वाभिरित्यादि मीमांसासारवेदिना सुज्ञानम्। स्मार्त्ताग्निसाध्ये तु कर्म्मणि सर्व्वासां सहाधिकारः। प्रथमविवाहाग्नावेवापरविवाहहोमविधानात्। तदसम्भवेऽग्निद्वयसंसर्गविधानाच्च*।

तथाच कात्यायनाश्वलायनौ।

सदारोऽन्यान् पुनर्दारानुद्वोढुं कारणान्तरात्।
यदीच्छेदग्निमान् कुर्व्वन् क्व होमोऽस्य विधीयते।
स्वेऽ(स्वा)ग्नावेव भवेद्धोमो लौकिके न कदाचन॥ इति।

---

* तद्विधान यथा—अथाग्नीनुद्वास्योद्वाह सपत्नीदत्तासयो।
सहाधिकारसिद्ध्यर्थमङ्ग यथाग्नि यौगिक॥
अरोगामसुहृल्लक्ष्यां धर्म्मसाधनमग्रयम्।
कृते तत्र विवाहे च प्रसङ्गे तु परेद्युरि।
पृथक् स्थण्डिलयोरग्नि समाधाय यथाविधि॥
तस्तु क्रत्वाज्यभागान्तमन्त्याधानादिक तत।
कुर्य्यात् पूर्व्वदयज्ञी तयान्वारब्ध आहुतीः॥
पत्न्योरेका यदि सुता दत्ता स्यैव तां पुन।
आहवनीयान्वया सार्द्धमाधानविधिना स्वकी॥ इत्यादि।

इदन्तु सति सम्भवे। ग्रामान्तरादावसम्भवे तु लौकिकाग्नौ विवाहहोमं कृत्वा तदनन्तरं मण्डनादियुक्तप्रकारेण* पुनराधानं कार्य्यम्।

मृतपत्नीकस्य द्वितीयविवाहे कालविशेष उक्तः मङ्गदे।

प्रमदासूतिवासरादितः
पुनरुद्वाहविधिर्वरस्य च।
विषमे परिवत्सरे शुभो
युगले चापि† सुतिप्रदो भवेत्॥ इति।

जीवन्त्यां पूर्व्वपत्न्यां द्वितीयादिविवाहे तु नायं कालनियमः।

इति श्रीविधानपारिजाते द्वितीयविवाहविधानम्।

अथ तृतीयमातुर्योविवाहस्य निषिद्धत्वात्तस्मिन्
कर्त्तव्ये विवाहविधिरुच्यते।

तत्र तृतीयां निषेधति मात्स्ये कश्यपः।

अपाकृत्य मृतं चापं लक्षण्यां स्त्रियमुद्वहेत्।
पुत्रपौत्रादिसम्पन्नः कुटुम्बी साग्निको(ऽग्नेः) नरः।

---

* तदुक्तप्रकारो यथा—

आधायां विवाहात्पूर्वं द्वितीयामुद्वहेद्यदि।
तदा वैवाहिकं कर्म कुर्य्यादावसथेऽग्निमान्॥ इति।

† अत्रैवं चापिरेवकारार्थक इति गोपीनाथः।

उद्वहेद्वितिसिद्ध्यर्थं तृतीयां न कदाचन ॥
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ।
नश्यत्येव न सन्देहो गर्गस्य वचनं यथा ॥ इति ।

अन्यत्रापि ।

धर्मयागनिमि(त्तो)त्तेऽपि नोद्वहेन्मानुषीं स्त्रियम् ।
तृतीयां यदि चोद्वाहेत्* तर्हि सा विधवा भवेत् ॥
चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ।
आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे ।
शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम् ॥

देशादि ब्रह्मपुराणे दर्शितम् ।

यामाद्याच्यामुदीच्यां वा सुपुष्पफलसंयुतम् ।
परीत्य यततोऽधस्तात् स्थण्डिलादि यथाविधि ॥

व्यासः ।

स्नात्वालं पूतवासासु रत्नगन्धादिभूषितः ।
सपुष्पफलशाखैकमर्कोद्वहं† समाचयेत् ॥
सन्नक्षत्रेण संयुक्तमर्कं संस्थाप्य यत्नतः ।
अर्ककन्याप्रदानार्थमाचार्य्य कल्पयेत् पुरा ॥
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।

---

* उद्वहेदित्यर्थम्, उद्वहेदित्यर्थे । निर्णयसिन्धावपि अयमेव पाठो दृश्यते ।

† इदमनिष्टम् शुद्धमिति च पुस्तके पाठः ।

नान्दीश्राद्धे हिरण्येन अष्टौ वर्गान्* प्रपूजयेत् ॥
पूजयेन्मधुपर्केण वरं (विप्रस्य हस्ततः) दाता तु शक्तितः ।
यज्ञोपवीतं वस्त्रे च हस्तकर्णादिभूषणम् ॥
उष्णीषगन्धमाल्यादि वरायास्मै प्रदापयेत् ।
स्वशाखोक्तविधानेन† मधुपर्कं समाचरेत् ॥

ब्रह्मपुराणे यथाविधीत्यस्यानन्तरमुक्तम् ।

कृत्वार्कपुरतस्तिष्ठन् प्रार्थयेत्तु द्विजोत्तमः ।
त्रिलोकवासिन् सप्ताश्व च्छायया सहितो रवे ।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥
तत्राध्यारोप्य देवेशं छायया सहितं रविम् ।
वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मन्त्रेण प्रपूजयेत् ॥

तन्मन्त्रेण आकृष्णेनेत्यादिना‡ ।

अन्यत्रापि ।

श्वेतवस्त्रेण संवेष्य तथा कार्पासतन्तुभिः ।

---

* अत्रापि माहकादेवाख्य पिटगणाख्या ।
गणेशदुर्गाक्षेत्रेशा कुलदेव्यष्टवर्गकाः ॥ इति स्मृतिदर्पणः ।

† स्वशाखा दाक्षशाखा इति केचित्, वरशाखेत्यन्ये ।
वरस्य या भवेच्छाखा तच्छाखाग्रयोदितं ।
मधुपर्कं प्रदातव्यो व्यत्ययार्थेऽपि दातरि ॥
इति वचनात् एतदेव सङ्गीकृत्य मयोक्तम् ।

‡ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

गन्धपुष्पैस्तथाभ्यर्च्य अर्घ्यलिङ्गैरभिषिच्य च ।
गुडौदनन्तु नैवेद्यं ताम्बूलञ्च समर्पयेत् ॥

व्यास: ।

अर्कं प्रदक्षिणीकुर्व्वन् जपेन्मन्त्रमिमं बुध: ।
मम प्रीतिकरा येय मया सृ(सृ)ष्टा पुरातनी ।
अर्कजा ब्रह्मणा सृष्टा साक्षाक प्रतिरक्षतु ॥
पुन: प्रदक्षिणीकुर्य्यान्मन्त्रेणानेन मन्त्रवित् ।
नमस्ते मङ्गले देवि नम. सवितुरात्मजे ।
त्राहि मा कृपया देवि पत्नी त्व म इहागता[*] ॥
अर्क त्व ब्रह्मणा सृष्ट: सर्व्वप्राणिहिताय च ।
तृचाणामादिभूतस्त्वं देवाना प्रीतिवर्द्धन[†] ।
तृतीयोद्भवज (दोष) पाप मृत्युत्थाश्च विनाशय ॥
आयुर्देहि यशो देहि प्रजां देहि पशूनपि ।
देहि मेऽर्क श्रिय पुष्टि स्वस्थानेऽर्क स्थिरो भव ॥
ततश्च कन्यावरण द्विपुरुष कुलमुच्चरेत् ।
आदित्य. सविता चार्क: पुत्री पौत्री च नप्तिका ॥
गोत्र काश्यपमित्युक्त्वा लोके लौकिकमाचरेत् ।
सुमुहूर्त्ते निरीक्ष्यार्क स्वस्तिसूक्त[‡]मुदीरयेत् ॥

---

* आपो हि ष्ठा इत्यादिभिरभिषेकमन्त्रै प्रथमाष्टकस्य ३८ पृष्ठे प्रदर्शिते ।

† त्व मे पत्नी इहागता इति त्व पुत्रके पाठ ।

‡ स्वस्ति न इन्द्रो वृद्धश्रवा स्वस्ति न पूषा विश्ववेदा स्वस्ति नस्तार्क्ष्योऽरिष्टनेमि स्वस्ति नो बृहस्पतिर्दधातु इति ।

आशीर्भिः सहितैः* कुर्यादाचार्यप्रमुखैर्द्विजैः ।
आचार्यश्च समाहूय विधिना तन्मुखाच्च ताम् ।
परिगृह्य ततो होमं स्वगृह्यविधिनाचरेत् ॥

आचार्यस्य दानमन्त्रमाह व्यासः ।

अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्म्मणे† तुभ्यं दत्तां विप्र समाश्रय ॥ इति ।

अङ्गुल्यङ्गुष्ठकर्म्माणि कृत्वा कङ्कणबन्धनम् ।
यावत्पश्चाहृतं सूत्रं तावदर्कं प्रवेष्टयेत् ।
स्वगाह्योक्तेन मन्त्रेण गायत्र्या वाथवा जपेत् ॥
पश्चीकृत्य पुनः सूत्रं स्कन्धे बध्नाति मन्त्रतः ।
इच्छामीति मन्त्रेण सूत्ररज्जां प्रकल्पयेत् ॥
अर्कस्य पुरतः पश्चादग्नेर्दक्षिणोत्तरयोस्तथा ।
कुम्भांश्च निक्षिपेत् पश्चादाग्नेयादिचतुष्टये ॥
सवस्त्रं प्रतिकुम्भञ्च त्रिः सूत्रेणैव वेष्टयेत् ।
हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलम् ॥
प्रतिकुम्भं महाविष्णुं सम्पूज्य परमेश्वरम् ।
पाद्या(र्घ्या)द्यैरादिनिवेद्यान्तं कुर्यान्नाक्त्वैव मन्त्रवित् ।

अत्र होमप्रकारः गौनकेन प्रदर्शितः ।

तृतीयस्त्रीविवाहे तु सम्प्राप्ते पुरुषस्य तु ।
आर्कं विवाहं वक्ष्यामि गौनकोऽहं विधानतः ॥

---

* आशीर्भिरभिरिति गोपीनाथः ।

† अमुकगोत्रायामुकशर्म्मणे इति गोपीनाथः ।

अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।
नान्दीमुखं प्रकुर्वीत स्थण्डिलञ्च प्रकल्पयेत् ।
अर्कमभ्यर्च्य सौर्य्या च मन्त्रपुष्पाक्षतादिभिः ॥

सौरी सूर्य्यदैवत्या ऋक् आकृष्णेनेत्यादिरूपा । तयेत्यर्थः ।

स्वयं चालङ्कृतस्तद्वदस्त्रमाल्यादिभिः शुभैः ।
अर्कस्योत्तरदिग्भागे समन्वारब्ध एतया ॥

एतया अर्ककन्यया ।

उल्लेखनादिकं कुर्यादाधारान्तमतः परम् ।
आज्याहुतिञ्च जुहुयात् सं गोभिरनयैकया* ॥
यत्ते त्वा काम कामायेत्येतयर्चा† ततः परम् ।
व्यस्ताभिश्च समस्ताभिर्व्याहृतय स्विष्टकृद्धवेत्‡ ।
परिषेचनपर्य्यन्तमयाग्नेत्यादिकं क्रमात् ॥

अत्र प्रार्थनामन्त्रादिविशेषमाह व्यास. ।

पुनः प्रदक्षिणं कृत्वा मन्त्रमेतमुदीरयेत् ।
मया कृतमिदं कर्म्म स्थावरेषु जरायुषा ।

---

* सं गोभिरित्यस्या मन्त्रस्यार्थो भग इत्यस्यैतन्मन्त्र विनियोग ।
अग्ने त्वित्यस्या न दम्पती अग्नि इत्यस्ते वाजपायए रिवाजी स्वाहा ॥

† यत्ते त्वा काम कामाय वर्षं यजाम्यहम् ।
तमस्मभ्य काम दक्षायेत्ते क्त घृत मिव स्वाहा ॥ इदमग्नये ।

‡ व्याहृतिभिरिति शेष । भूः स्वाहा इदमग्नये । भुवः स्वाहा इद वायवे ।
स्वः स्वाहा इद सूर्य्याय । भूर्भुवः स्वः स्वाहा इद प्रजापतये एवदग्नि ।

§ तत स्विष्टकृत इतीति पाठो बहुषु निबन्धेषु दृश्यते ।

अर्कोपत्यानि नो देहि तत्सर्व्वं क्षन्तुमर्हसि ॥
इत्युक्ता शान्तिसूक्तानि* जप्त्वा तं (तत्) विसृजेत्ततः।
गोयुग्मं दक्षिणां दद्यादाचार्य्याय च शक्तितः ॥
इतरेभ्योऽपि विप्रेभ्यो दक्षिणां चापि शक्तितः।
तत्सर्व्वं गुरवे दद्यादन्ते पुण्याहमाचरेत् ॥

अत्र पञ्चमदिने कर्त्तव्यमुक्तं ब्रह्मपुराणे।

चतुर्थे दिवसेऽतीते पूर्व्ववत्तां प्रपूजयेत्।
विसृज्य होममग्निञ्च विधिना मानुषीं पराम् ॥
उद्वहेदन्यथा नैव पुत्रपौत्रादिहन्ति मान्।
न पशून्न च मित्राणि मङ्गलं नैव गच्छति ॥
एवमेव द्विजश्रेष्ठ विधिना सम्यगुद्वहेत्।
धनधान्यसमृद्धिश्च इच्छाशक्तिः परत्र च ॥ इति।

अथैषां वचनानामेकवाक्यतया सङ्क्षेपेण प्रयोगः प्रस्तूयते।

तृतीयमानुषीविवाहस्य निषिद्धत्वात् तृतीयोऽर्कविवाहः कार्य्यः। पूर्व्वोक्ते आदित्यवासरे हस्तनक्षत्रे शनैश्चरे वा अन्यस्मिन् शुभदिने वा पूर्व्वाह्णे ग्रामात्प्राच्यामुदीच्यां वा फलपुष्पसंयुतमर्कवृक्षं गत्वा कृतनित्यक्रियो यजमानः प्राणानायम्य देशादिकं स्मृत्वा मम तृतीयमानुषीविवाहजन्य(दोषाभावार्थं)दोषपरिहाराय अर्कविवाहं करिष्ये इति सङ्कल्प्य अर्ककन्याप्रदानार्थमाचार्य्यं यथाविधि कृत्वा स्वस्तिवाचनं कृत्वा हिरण्येन नान्दीश्राद्धं कुर्य्यात्।

---

* अग्नौ, वास्त्वादीनि, प्रथमखण्डस्य ४९४ पृष्ठे प्रदर्शितानि।

अथाचार्यः स्वगृह्योक्तविधिना मधुपर्केण वरं पूजयित्वा तस्मै यज्ञोपवीतं वस्त्रद्वयं हस्तकर्णादिभूषणं शिरोवेष्टनादिकञ्च दद्यात्। अथाचार्यो यजमानो वा सुवर्णनिर्म्मितां सूर्य्यप्रतिमामर्कवृक्षञ्च आकृष्णेनेति मन्त्रेण* षोड़शोपचारैः† पूजयेत्। अर्कस्य प्रतिमाञ्चैव गन्धपुष्पाक्षतादिभिः। इति वचनात्। तथा। श्वेतवस्त्रेण संवेष्ट्य तथा कार्पासतन्तुभिः। संवेष्ट्य अर्कमिति शेषः। आपो हि ष्ठेत्यादिभिरक्लिन्नकैर्मन्त्रैरभिषिच्य गुड़ौदनं नैवेद्यं दत्त्वा ताम्बूलं दक्षिणाञ्च सपुष्पाञ्जलिं दद्यात्।

अथार्कस्य पुरतस्तिष्ठन् प्रार्थनां कुर्य्यात्। तत्र मन्त्रौ।

त्रिलोकभासिन् सप्ताश्व छायया सहितो रवे।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥
दृष्टाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धन।
तृतीयोद्वाहजं पापं मृत्युञ्चाशु निवारय॥ इति।

अर्कस्य चोत्तरे देशे स्थण्डिलन्तु प्रकल्पयेत्।
उल्लेखनादिकं कृत्वा स्थापयेदनलं ततः।
कृत्वाज्यभागपर्य्यन्तं कन्यादानं ततः स्मृतम्॥

---

* ६८ पृष्ठे प्रदर्शितेन।

† षोड़शोपचारा यथा प्रपञ्चसारे—

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्कोऽथ स्नानञ्च वसनाभरणानि च॥
गन्धाक्षतपुष्पधूपदीपनैवेद्यवन्दनम्।
मयोनमस्कृतेनात्मोपचारांश्च षोड़श॥ इति।

विश्वादर्शं तु । ततो वरोऽर्कं प्रदक्षिणीकुर्यात् । तत्र मन्त्रः ।

मम प्रीतिकरा यैयं (मया) पुरा सृष्टा पुरातनी ।
अर्कजा ब्रह्मणा सृष्टा साक्षाकं परिरक्षतु ॥

पुनरपि प्रदक्षिणं कुर्यात् । तत्रापि मन्त्रः ।

नमस्ते सङ्गले देवि नमः सवितुरात्मजे ।
त्राहि मां कृपया देवि पत्नी त्वं म इहागता ॥ इति ।

पुनः प्रदक्षिणं कुर्वन् पुष्पाञ्जलिमर्क क्षिपेत् ।

अनन्तरमाचार्यः अर्ककन्यादानमहं करिष्ये इति सङ्कल्प्य काश्यपगोत्रस्य अर्कस्य प्रपौत्रीं काश्यपगोत्रस्य सवितुः पौत्रीं काश्यपगोत्रस्यादित्यस्य पुत्रीमिमामर्ककन्यां यथाशक्ति विभूषितां प्रजापतिदेवताकां यथासम्भवगोत्राय अमुकस्य प्रपौत्राय अमुकस्य पौत्राय अमुकस्य पुत्रायामुकशर्मणे वराय तुभ्यं सुमुहूर्ते सम्प्रदद्मे इत्युक्त्वा मन्त्रमिमं पठेत् ।

अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ इति ।

अथ वरः कोऽदादिति मन्त्रं* गायत्रीं वा जपित्वा पश्चीकृतं† कुङ्कुमाक्तं सूत्रं स्तम्भेऽर्कस्य बध्नीयात्साङ्गुष्ठतन्तुनानेनेति मन्त्रेणेति ।

---

* कोऽदात्कस्मा अदात् कामोऽदात् कामायादात् ।
कामो दाता कामः प्रतिगृहीता कामैतत्ते ॥ यजु. अध्या. यजु ।

† पञ्चाङ्गमिति च पुस्तके पाठः ।

अथ अक्षतारोपणकङ्कणबन्धनादि पूर्ववत् कुर्यात्।

अथार्कहस्तस्य पूर्वोक्तदिशि अष्टौ कुम्भान् स्थापयित्वा हरिद्रागन्धसंयुक्तशीतलजलेनापूर्य्य वस्त्रैः सूत्रेण प्रतिकुम्भं कण्ठेषु वेष्टयित्वा तत्र परमेश्वरं महाविष्णुं नाममन्त्रेणावाह्य षोड़शोपचारैः पूजयित्वा प्रार्थयेत्।

तत्र मन्त्रो यथा।

विश्वव्यापिन् नमस्तेऽस्तु भक्तमिष जनार्दन।
तुरीयस्य विवाहस्य अधिकारं प्रयच्छ मे॥ इति।

अथार्ककन्यया समन्वारब्धो देशादि सङ्कीर्त्य अर्कविवाहाङ्गभूतं होममहं तदङ्गतयाऽन्याधानञ्च करिष्ये। अग्निमन्वाहितेऽन्याधित्यादि चतुर्थो आज्येनेत्यन्तमुक्त्वा अत्र प्रधानं बृहस्पतिमग्निं वायुं सूर्य्यं प्रजापतिञ्चैकैकया आज्याहुत्या आज्येन शेषेण स्विष्टकृतं यजे इति (सङ्कल्प्य) उक्त्वा अन्वाधानाद्याधारान्तं कुर्यात्। विवाहादौ तु आधारान्तं पूर्वमेव कार्य्यमित्युक्तम्।

सं गोभिरिति मन्त्रस्य अङ्गिरा ऋषिर्बृहस्पतिर्देवता त्रिष्टुप् छन्दः अर्कविवाहाङ्गभूताज्यहोमे विनियोगः।

ॐ सं गोभिराङ्गिरसो नक्षमाणो
भग इवेदर्य्यमणं निनाय।
जने मित्रो न दम्पती अनक्ति
बृहस्पते वाजयाशूए रिवाजी स्वाहा॥

१०म, ६८सू, २ऋक्।

बृहस्पतये इदं न मम।

यस्मै त्वेत्यस्य वामदेव ऋषिरग्निर्देवता विष्टुप् छन्दः अर्क-विवाहाङ्गभूताज्यहोमे* विनियोगः।

ॐ यस्मै त्वा काम कामाय वयं सम्राड्यजामहे।
तमस्मभ्यं कामं दत्त्वायेदं त्वं घृतं पिब स्वाहा॥

अग्नये इदम् न मम।

ततो व्याहृतिभिश्चतुष्टयं हुत्वा स्विष्टकृदादिहोमयेयं समापयेत्। एवं होमं समाप्य वृद्धं प्रार्थयेत्। पुनः प्रदक्षिणं कृत्वा मन्त्रमेतमुदाहरेत्।

मया कृतमिदं कर्म्म स्थावरेषु जरायुणा।
अर्कोपत्यानि नो देहि तत्कर्म्म वन्तुमर्हसि॥

इत्युक्त्वा शान्तिसूक्तानि† जप्त्वा तं विसर्जयेत् पुनः।
गोयुगं दक्षिणां दद्यादाचार्य्याय च भक्तितः॥
तदृत्विग्प्रतिमादीनि सर्व्वं दद्यात्प्रयत्नतः।
स्वयं नूतनवस्त्राणि धृत्वा पुण्याहमाचरेत्॥
इतरेभ्योऽपि विप्रेभ्यो देया तत्र च दक्षिणा।
ततस्तुष्टो गृहं गत्वा भुञ्जीयाद्बन्धुभिः सह॥
चतुर्थदिवसादूर्द्धं पञ्चमेऽह्नि ततस्तदा।
अर्कप्रदेशमेत्याथ पूर्ववत् सम्पूज्य च।

पूर्ववत् आकृष्णेनेति मन्त्रेण गन्धादिभिरित्यर्थः।

विसृज्याग्निं कृष्णस्य मानुषीमुद्वहेत्पराम्॥ इति।

---

* अर्कविवाहप्रधानाज्यहोमे इति संस्कारप्रभाषायां पाठः।

† ॐ नो मित्र इत्यादीनि, प्रथमखण्डस्य ४२४ पृष्ठे द्रष्टव्यानि।

अनेनाग्निसंरक्षणं पञ्चमदिनपर्य्यन्तं कर्त्तव्यमिति गम्यते ।

अनेन विधिना यस्तु कुर्य्यादर्कविवाहकम् ।
पुत्रपौत्रादिसम्पत्तिं चतुर्य्यां लभते नरः* ॥

इति श्रीविधानपारिजाते श्रीमदनन्तभट्टविरचिते
अर्कविवाहप्रयोगः समाप्तः ।

अथ विवाहहोमोत्तरकर्त्तव्यमौपासनहोमविधानमभिधीयते ।

तत्राश्वलायनगृह्यम् ।

पाणिग्रहणा(दि)दौ गृह्यं परिचरेदिति ।

अत्र पाणिग्रहणादिवचनं गृहप्रवेशहोमात् पूर्व्वत्वार्थम् ।

तथाच गृह्यपरिशिष्टम् ।

अथ नित्योपासनं तस्य सायमारभ्य इति ।

श्रौनकोऽपि ।

यस्मिंस्मिन् विवाहः स्यात् सायमारभ्य तस्य तु ।
परिचर्य्या विवाहाग्नेर्विदधीत स्वयं द्विजः ॥
यदि रात्रौ विवाहाग्निकृत्यवः स्यात्तथा सति ।
उपक्रम्योत्तरस्याङ्गः सायं परिचरेदमुम् ॥ इति ।

---

* अथ चार्कविवाहः काम्यप्रयोगिषो न भवति मोक्षैकात् इति किंचित् । मोक्षैकात्व न दोषायेत्यर्थे । काम्यप्रयोगी वरः स्वगोत्रविहितगोत्रिप्रसाध्यं परिकल्प्य तत्कार्यं इति यद्भवति । आचार्यस्तु मूर्खेण दत्ता विद्यापि काम्यप्रयोगस्थाने स्वगोत्र कन्याविवेषत्वेन सद्गोत्रं आदित्यशब्दितकर्त्तृस्थाने स्वपितामहपित्रो स्वस्य च नामानि क्रमेण सङ्कीर्त्तयन् । एवं दोषेण काम्यप्रयोगस्य अर्कविवाहो नित्यांगो भवतीति मीमांसाय ।

इदमपि नवनाड्यतिक्रमे द्रष्टव्यम् ।

तथाचापस्तम्बसूत्रभाष्यकृत् सुदर्शनाचार्यः ।

तस्य चारम्भणं रात्रावेव यदि नवनाड्यो नातीताः ।

अतीतायेत् परेद्युः सायमग्निहोत्रवेलायामारभ्य इति ।

अन्यत्रापि ।

प्रातर्होमे सङ्गवान्तः*कालस्त्वनुदितेऽथवा ।

सायमस्तमिते होमः कालस्तु नवनाडिकाः ॥ इति ।

अत्रानुदितहोमकालस्तु वाजसनेयिना वेदितव्यः ।

तथाच कात्यायनसूत्रम् ।

औपासनस्य परिचरणमस्तमितानुदितयोरिति ।

तेषामौपासनस्यारम्भोऽपि चतुर्थीहोमानन्तरमाहितेऽग्नौ भवति न तु विवाहाग्नौ । आवसथ्याधानं दारकाले दायाद्यकाले वेति कात्यायनसूत्रात् । तत्राद्यमपि । दारकालश्चतुर्थ्युत्तरकालः । दायाद्यकालो धनविभागकाल इति । औपासनात् पूर्वं यदि विवाहाग्निः शाम्येत तदा प्रायश्चित्तमुक्तं विस्तादर्शे ।

उद्वाहौपासनात् पूर्वमनले शान्तिमागते ।

स्थालीपाकं ततः कृत्वा औपासनमथाचरेत् ॥

नवनाडिभ्य ऊर्द्धं चेत् स्थालीपाको भवेत वै ।

औपासनं तदा कुर्य्यात् परेद्युः सायमेव च ॥ इति ।

---

* यत्तु नवनाडिकः कालः प्रथमादित्योदयादर्वाक् ।

स होमकालो विप्राणां सङ्गवान्त इति स्मृतः ॥ इत्यादिवचनम् ।

तस्य प्रादुष्करणकाल उक्त आश्वलायनसूत्रे ।

तस्याग्निहोत्रेण प्रादुष्करणहोमकालो व्याख्याताविति ।

सत्कारिकापि ।

ज्वलयेदपराह्णेऽग्निमस्तं याते दिवाकरे ।

पर्य्युह्याग्नि परिस्तीर्य पर्य्युह्य च ततः परम् ॥ इति ।

अत्र स्वप्नमाह कात्यायनः ।

सूर्य्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः ।

प्रादुष्करणमग्नीना प्रातर्भासामदर्शने ॥ इति ।

तथा ।

दुहित्वा स्रुचया वाग्निविहारो* न विरुध्यते ।

नि(लिंप)र्नेजनञ्च पाषाणासुपलेपनमेव च ॥ इति ।

उक्तकाले प्रादुष्करणाभावे प्रायश्चित्तमुक्तमाश्वलायनकारिकायाम् ।

प्रायश्चित्त विधिषेण यत्र नोक्त भवेद्विधिः ।

होतव्याव्याहृतिस्तत्र भूर्भुवःस्वरितीति च ॥

अनुदितास्तमयलक्षणमाह कात्यायनः ।

राचेस्तु पोडशे भागे ग्रहनक्षत्रभूषिते ।

काल स्वनुदित ज्ञात्वा तत्र होम प्रकल्पयेत् ॥

तथा ।

यावत्सम्यङ् न भाव्यन्ते नभस्यूष्माणि सर्व्वतः ।

न च लौहित्यमायाति† तावत्सायन्तु ह्नयते ॥

---

* विहारो विहरणमुद्वरणमिति यावत् । इति भीषोमाद्यः ।

† लोहितत्वञ्च नापैति इति सत्कारत्नमालायां पाठः, स एव समीचीनतया प्रतिभाति ।

अत्र आश्वलायनादीनां होमे मुख्यकालमाह चन्द्रिकायामत्रिः ।

अस्तादूर्ध्वं रविर्यावद्भुवं क्षिप्त्वा न गच्छति ।
तावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम् ।
रात्रौ प्रदोषो मुख्यः स्यादिति वेदविदो विदुः ॥ इति ।

अत्र गौणकालमाह गौनकः ।

पश्चादस्तमयात्कालो यो भवेन्निमुहूर्तकः ।
स सायं होमकालस्य प्रदोषान्त उदाहृतः ॥
यस्तु पञ्चाह्निकः कालः पश्चादेवोदयाद्रवेः ।
स होमकालो विप्राणां सङ्गवान्त इति स्मृतः* ॥ इति ।

यदि गौणकालोऽप्यतीतः स्यात्तदा प्रायश्चित्तमुक्तं गृह्यपरिशिष्टे ।

नित्यहोममतीत्य मनस्त्वत्वा चतुर्गृहीतं जुहुयात् । द्वादशरात्रादूर्ध्वं पुनराधानमिति ।

केचित्तु प्रायश्चित्तं कृत्वा प्रातर्होमात् पूर्वं सायं होमः कार्यः सायं होमात् पूर्वं प्रातर्होमः कार्य इत्याहुः ।

आसायं कर्मणः प्रातरासातः सायं कर्मणः ।
आहुतिर्नातिपद्येत पार्वणं पार्वणान्तरात् ॥

इति बौधायनस्मृतेरिति ।

तस्य अग्निहोत्रेणेति सूत्रं प्रपञ्चितं गौनकेन ।

अग्निहोत्रवदित्येतच्छौनकेन प्रपञ्चितम् ।
पुनः पर्य्युह्य चाङ्गारानुदगग्नेरपोह्य च ॥

---

* अत्र निदानसूत्रे सर्वमेतत् प्रतराप्तेः स्वयं सम्यक् दर्शितं कालसामान्ये पूर्वं दर्शो दर्शितः इत्यत्र पूर्वमासस्य इति, सङ्गवादिसङ्गविषयान्तर्विषयत्वेन दर्शितत्वात् ।

तस्य प्रादुष्करणकाल उक्त आश्वलायनसूत्रे ।

तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्याताविति ।

सत्कारिकापि ।

ज्वलयेदपराह्णेऽग्निमस्तं याते दिवाकरे ।

पर्युह्याग्निं परिस्तीर्य पर्युह्य च ततः परम् ॥ इति ।

अत्र स्पष्टमाह कात्यायनः ।

सूर्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः ।

प्रादुष्करणमग्नीना प्रातर्भोसामदर्शने ॥ इति ।

तथा ।

दुहित्रा स्रुपया वाग्निविहारो* न विरुध्यते ।

नि(लिंप)नेंजनञ्च पाषाणमुपलेपनमेव च ॥ इति ।

उक्तकाले प्रादुष्करणाभावे प्रायश्चित्तमुक्तमाश्वलायनकारिकायाम् ।

प्रायश्चित्तं विधेयेषु यत्र नोक्तं भवेद्विधिः ।

होतव्याज्याहुतिस्तत्र भूर्भुवःस्वरितीति च ॥

अनुदितास्तमयलक्षणमाह कात्यायनः ।

राजेषु षोडशे भागे ग्रहनक्षत्रभूषिते ।

काल स्वनुदित ज्ञात्वा तत्र होम प्रकल्पयेत् ॥

तथा ।

यावत्तम्बड् भाद्यन्ते नभस्यृक्षाणि सर्व्वतः ।

न च लौहित्यमायाति† तावत्सायन्तु ह्नयते ॥

---

* विहारो विहरणमुद्धरणमिति यावत् । इति गोपीनाथः ।

† लोहितत्वञ्च नाप्नोति इति सत्कारत्नमालायां पाठः, स एव समीचीनतया प्रतिभाति ।

अत्र आश्वलायनादीनां होमे मुख्यकालमाह चन्द्रिकायामत्रिः ।

दृष्टादूर्ध्वं रविर्यावद्भुवं हित्वा न गच्छति ।
सावद्धोमविधिः पुण्यो नान्योऽभ्युदितहोमिनाम् ।
रात्रौ प्रदोषो मुख्यः स्यादिति वेदविदो विदुः ॥ इति ।

अत्र गौणकालमाह शौनकः ।

पश्चादस्तमयात्कालो यो भवेन्निमुहूर्त्तकः ।
स चायं होमकालस्य प्रदोषान्त उदाहृतः ॥
यस्तु पश्चाद्विकः कालः पश्चादेवोदयाद्रवेः ।
स होमकालो विप्राणां सङ्कटान्त इति स्मृतः* ॥ इति ।

यदि गौणकालोऽप्यतीतः स्यात्तदा प्रायश्चित्तमुक्तं दृष्टपरिशिष्टे ।

नित्यहोममतीत्य मनस्त्वया चतुर्गृहीतं जुहुयात् । द्वादश-
रात्रादूर्ध्वं पुनराधानमिति ।

केचित्तु प्रायश्चित्तं कृत्वा प्रातर्होमात् पूर्वं सायं होमः कार्यः सायं होमात् पूर्वं प्रातर्होमः कार्य इत्याहुः ।

आसायं कर्म्मणः प्रातरामातः सायं कर्म्मणः ।
आहुतिर्नातिपद्येत पार्व्वणं पार्व्वणान्तरात् ॥

इति बौधायनस्मृतेरिति ।

तस्य अग्निहोत्रेणेति सूत्रं प्रपञ्चितं शौनकेन ।

अग्निहोत्रवदित्येतच्छौनकेन प्रपञ्चितम् ।
पुनः पर्य्युक्ष्य चाङ्गारानुदगग्नेरपोह्य च ॥

---

* यत्र निशामुखे कर्म्मणः प्रातराहुतेः व्याप्तः सन्ध्या यदि सायमाहुतेः पूर्वं दर्शे दर्शस्य पक्ष पूर्वमासस्य वेति, तत्राह्यस्यादिमकलादिपर्यन्तविषयमिति गोपीनाथः ।

दौम्यानां द्वादशानान्तु पक्वमेतेष्वधिश्रयेत् ।
पयो यवागूः सर्पिश्च ओदनं दधितण्डुलाः ॥
सोमस्तैलमयो व्रीहिर्द्वादशैते तिला यवाः ।
पय आदीनि चत्वारि विदुः पक्वानि याज्ञिकाः ॥
दध्यादीनामपक्वानामधिश्रयणमिष्यते ।
दर्व्वुकेन तज्ज्वलयेदपक्वं पक्वमेव च ॥
अधिश्रिते स्रुवेणापः परिषिञ्चेच्चयानि च ।
पुनस्त्रिर्ज्वलता तेन परिप्लुत्य प्रहृत्य तत् ॥
च(द)दाकर्षन्निवोद्वास्याग्नेरानतिदूरतः ।
अग्नेः प्रणीतृणिष्वेव निधाय समिधा सह ।
तेषामेकं संस्कृतञ्च गृहीत्वा सायमग्नये ॥
तेषां द्वादशद्रव्याणां मध्ये एकं द्रव्यमित्यर्थः ।
स्वाहेति मन्त्रमुच्चार्य्य कुर्व्वीत प्रथमाहुतिम् ।
प्रातर्होमे तु सूर्य्याय स्वाहेति प्रथमाहुतिम् ।
तूष्णीं प्रजापतिं ध्यायेदुभयत्र द्वितीयकम् ॥ इति ।
अन्यो विशेषः स्वस्वशाखातोऽवगन्तव्यः ।
होमस्थानं स्मृत्यर्थसारे ।
बहुशुष्केन्धनेनाग्नौ सुसमिद्धे हुताशने ।
अङ्गारे लेलिहाने च होतव्यं नान्यथा क्वचित् ॥
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारे चैव मानवः ।
मन्दाग्निरामयावी च दरिद्रश्चोपजायते ।
अग्निः प्रदक्षिणावर्त्तः कर्म्मदश्च शुभावहः ॥ इति ।

मन्त्रोपस्थापनमन्वानाह शौनकः ।

परिसमुह्य पर्य्युक्ष्याप्युपतिष्ठेद्विभुंजम् ।
अग्नेः सूक्तैश्च* सौरैश्च† प्राजापत्यैश्च नित्यशः ॥

याज्ञवल्क्योऽपि ।

हुत्वाग्निं सूर्यदैवत्यान् जपेन्मन्त्रान् समाहितः ।

एतद्धोमप्रशंसामाहाङ्गिराः ।

प्रदद्याल्काञ्चनं मेरुं पृथिवीं (च) वा ससागराम् ।
तत् सायं प्रातर्होमस्य तुला भवति वा न वा ॥ इति ।

अन्यत्रापि ।

नाग्निहोत्रात्परो धर्मो नाग्निहोत्रात्परं तपः ।
नाग्निहोत्रात्परं (स्वा)दानं नाग्निहोत्रात्परा गतिः ॥

तथा ।

आद्या व्याहृतयस्तिस्रः स्वधा स्वाहा नमो वषट् ।
यस्यैते वेश्मनि सदा ब्रह्म(लोकः)भूतः स एव तु ॥

अकरणे प्रत्यवायमाह गर्गः ।

क्षतदारो न तिष्ठेत क्षणमप्यग्निना विना ।
तिष्ठेत चेद्विजो ब्रात्यस्तथाच पतितो भवेत् ॥
यथा स्नानं यथा सन्ध्या वेदस्याध्ययनं यथा ।
तथैवोपासनं कार्यं न स्थितिस्तद्वियोगतः ॥
यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते ।

---

* अग्नेसूक्तकाण्डके, प्रथमखण्डस्य १८६ पृष्ठे प्रदर्शितैः ।

† सदुर्यमित्यादिकैः, प्रथमखण्डस्य ७०० पृष्ठे प्रदर्शितैः ।

अन्नं तस्य न भोक्तव्यं हव्यपाकी हि स स्मृतः ॥
यत्र नाश्नन्ति वै देवाः पितरोऽतिथयस्तथा ।
हव्यपाकः स विज्ञेयो न तस्यादात्कथञ्चन ॥
हव्यपाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति* ॥ इति ।

इति नित्यहोमविधानम् ।

अथ सूतकादौ होमविधानम् ।

तत्र कात्यायनः ।

सूतके मृतके प्राप्ते नित्यकर्म न सन्त्यजेत् ।
विष्टयज्ञं चरुं होममसगोत्रेण कारयेत् ॥

चरुं स्थालीपाकं, होमं नित्यहोमम् ।

शौनकोऽपि ।

स्मार्त्ताग्निं सूतके प्राप्ते स्वयं न जुहुयाद्द्विजः ।
श्रौताग्निन्तु स्वयं हुत्वा समाप्ते वा स्वयं हुनेत् ॥
स्मार्त्ताग्निमात्मनोऽन्येषामभावे सूतकादिषु ।
समारोप्य तदग्नेस्तु विहृत्य जुहुयात्स्वयम् ॥

---

* अस्य प्रतिप्रसवमाह स एव ।

विहृतपाकोपयोगी च स्मार्तपाकोपयोगिकः ।
प्रणाड्यग्नयनिष्ठो वा न दुष्येत्तादृशो द्विजः ॥

अतीताहुतयः सर्व्वा हुनेन्निष्कृतिपूर्व्विकाः ।
हुतैश्चतुर्गृहीतैस्तु कार्य्या तन्निष्कृतिः सदा ॥
अतीते द्वादशाहे तु पूर्णाहुत्यष्टकं हुनेत् ।
प्राड्मा(मा)नाद्य ततो हुत्वा गार्ह्योऽप्यग्निर्विनश्यति ॥

जायत्यनलेऽपि स एवाह ।

जाग्रत्येवानले होमानतिक्रामेद्वह्निनपि ।
आज्यं चतुर्गृहीत्वैतत् स्रुवेण प्रक्षतस्रुचि ॥
तदा कृत्वाज्यसंस्कारं यथोक्तविधिना ततः ।
आज्यं चतुर्गृहीत्वैतत् स्रुवेण प्रक्षतस्रुचि ॥
उक्त्वा मन्त्रं मनो ज्योतिर्जुषतामिति* पूर्व्वकम् ।
हुत्वा सकृदतीतांश्च होमान् कृत्वा यथाक्रमम् ॥
पश्चात् स्वकालहोमञ्च विदधीत यथा पुरा ।
प्रायश्चित्तमिदं केचित् प्रतिहोमव्यतिक्रमे ॥ इति ।

आहुरिति शेषः ।

चन्द्रिकायामपि ।

कालातीतेषु होमेषु उत्तरेष्वागतेषु च ।
कालातीतानि हुत्वैव उत्तराणि ततश्चरेत् ॥
यस्त्वतीतान्यतिक्रम्य उत्तराणि समाचरेत् ।
न देवान्नेव च पितॄंस्तस्यविस्तूपतिष्ठते ॥ इति ।

अथेतिकर्त्तव्यतामाह स एव ।

---

* मनो ज्योतिर्जुषतामाज्यस्य वेतु सूर्य्यस्तिर्यङ्मिमिन्न तनोतु । अरिष्टं यज्ञं समिमं दधातु विश्वेदेवास इह मादयन्तामों प्रतिष्ठ ॥

पृथक् पृथगतीतासु होतव्या हुतयोऽखिलाः ।
नित्याग्निहोत्रवद्धुत्वा परिस्तीर्य्य प्रति प्रति ॥ इति ।

अन्यत्रापि ।

प्रतिहोममविस्मृत्य कुर्यात् परिसमूहनम् ।
पर्य्युक्षणं चेत्युक्तोऽयमौपासनविधिक्रमः ॥
इति सूतकादौ होमविधाननिर्णयः ।

अथापवस्य कालद्वयेऽपि होमाशक्तौ प्रजापतिराह ।

सायप्रातस्तनौ होमावुभौ सायं समस्य तु ।
आपन्नो जुहुयात्तत्र समिदेकाथवा द्वयम् ॥
सायंहोमस्य मुख्यत्वात्तदीयं तन्त्रमिष्यते ।
ततस्त्र आहुती कुर्य्यात्तत्र द्वे सायमाहुती ॥
द्वे प्रातराहुती सायं होमे चैका समिद्यदि ।
समित् स्यात् द्वितीया चेत् सा भवेत्प्रातराहुतौ ॥
द्विः सायं होमवन्मृज्याद्विः प्रातर्होमवत् सु(च)वम् ।
उपस्थानं सकृत्कार्य्यं शेषं प्रकृतिवद्भवेत् ॥

अत्र सुवपरिग्रहणमाज्यहोमादिविषयम् ।

तथा ।

केचिद्वे आहुती हुत्वा संवे(वि)श्यैव निमील्य (च) वा ।
विच्छिद्यैवं तु तौ होमौ कुर्युर्द्वे आहुती ततः ॥
गुर्व्वापदि समस्यन्ते प्रातः सर्व्वे कदाचन ।
यावन्तोऽत्र समस्यन्ते सर्व्वे सायमुपक्रमाः ।
प्रातःकालापवर्गाय न तु प्रातरुपक्रमाः ॥ इति ।

आश्वलायनगृह्यपरिशिष्टेऽपि ।

सायंप्रातर्होमौ सायं वा समस्यस्य तु प्रातरिति ।

अत्रापि विशेषः स्मृतिभास्करे ।

सञ्चैयौपवसथ्याहे सायं होमः पृथग्भवेत् ।

तथैव यजनीयेऽह्नि प्रातर्होमो भवेत् पृथक् ॥

इति होमसमासविधानम् ।

अथ पञ्चहोमविधानम् ।

तत्र वैयाघ्रपद्यः ।

एकेऽभ्युदितहोमाः स्युरन्येऽनुदितहोमिनः ।

अन्ये तु दिनहोमाश्च पञ्चहोमास्तथापरे ॥

प्रवासी चाग्निहोत्री (त्र) यस्तीन् पञ्चाहांश्च सप्त वा ।

दातव्यो होम एकाहे सायंप्रातः पृथक् पृथक् ॥ इति ।

अनेन यावत्कालं व्यासङ्गस्तावद्धोमोऽभ्यनुज्ञायते । न तु पञ्चहोम-नियमः ।

मरीचिरपि ।

शरीरापद्भवेद्यत्र भयार्त्तश्च प्रजायते ।

तथान्यास्वपि चापत्सु पञ्चहोमो विधीयते ॥

पञ्चहोमं तथा कृत्वा मध्ये तत्राग्निरुत्थितः* ।

होमं पुनः प्रकुर्य्यात्तत्र दोषो न विद्यते ॥

---

* इतीदं पञ्चहोमेषु मध्ये तत्राग्निरुत्थितः ।

होमं पुनः प्रकुर्य्यात्तत्र चाग्नौ होमत्रयं चरेत् ॥ इति संस्काररत्नमालायां पाठः ।

पृथक् पृथगतीतासु होतव्या हुतयोऽखिलाः ।
नित्याग्निहोत्रवद्धुत्वा परिस्तीर्य्य प्रति प्रति ॥ इति ।

अन्यत्रापि ।

प्रतिहोममविस्मृत्य कुर्यात् परिसमूहनम् ।
पर्य्युक्षणं चेत्युक्तोऽयमौपासनविधिक्रमः ॥
इति सूतकादौ होमविधाननिर्णयः ।

अथायत्नस्य कालद्वयेऽपि होमाशक्तौ प्रजापतिराह ।

सायंप्रातस्तनौ होमावुभौ सायं समस्य तु ।
आपन्नो जुहुयात्तत्र समिदेकाथवा हयम् ॥
प्रातर्होमस्य मुख्यत्वात्तदीयं सन्निधापने ।
चतस्र आहुती कुर्य्यात्तत्र द्वे सायमाहुती ॥
द्वे प्रातराहुती सायं होमे चैका समिद्यदि ।
समित् कृता द्वितीया चेत् सा भवेत्प्रातराहुतौ ॥
द्विः सायं होमवन्मृज्याद्विः प्रातर्होमवत् सु(च)वम् ।
उपस्थानं सङ्कल्प्यं शेषं प्रकृतिवद्भवेत् ॥

अत्र सुवग्रहणमाज्यहोमादिविषयम् ।

तथा ।

कैश्चिद्धे आहुती हुत्वा संवे(वि)श्यैव निमील्य (च) वा ।
विच्छिद्यैवं तु तौ होमौ कुर्युर्द्वे आहुती ततः ॥
मुर्व्वापदि समस्यन्ते प्रातः सर्व्वे कदाचन ।
यावत्तोऽत्र समस्यन्ते सर्व्वे सायमुपक्रमाः ।
प्रातःकालापवर्गाय न तु प्रातरुपक्रमाः ॥ इति ।

उदयेऽस्तमये वापि दम्पती चेद्विनिर्गतौ ।
आरूढौ वा धृतौ वाग्निर्लौकिकः स्यात्तदैव हि ॥
प्रेषिते तु प्रिये पत्नी यदि ग्रामान्तरं व्रजेत् ।
होमकाले यदि प्राप्ता न सा दोषेण युज्यते ॥

कात्यायनस्तु ।

अग्नावनुगते यत्र होमकालद्वयं व्रजेत् ।
उभयोर्विप्रवासे वा लौकिकाग्निर्विधीयते ॥

अत्र सभार्य्यस्य चिरकालप्रवासकरणमस्ति चेत्तदा अरण्योराग्नि समिधि वा अग्निं समारोप्य गच्छेत् ।

तथाच शौनकः ।

अथ प्रयाणाद्यापत्सु समारोपणमुच्यते ।
अरण्याग्निसमित्स्वेव गृह्यस्याग्नेर्यथाविधि ॥
अग्नौ प्रज्वलिते गृह्ये प्रतपेदरणीद्वयम् ।
अग्नत्यं समिधं वापि अयं ते योनिरित्यृचा* ॥
या ते अग्ने यज्ञियेति पाषाणारोपयेत वा ।
आपद्येवं समारोप्य ततः प्रत्यवरोहयेत् ॥
अथारण्यो. समारूढमरणीभ्यां मथेत् पुनः ।
प्रत्यवरोहेत्यनयायात्मारूढं ततः स्वसन् ॥
आत्मारूढाग्निमादध्यालौकिकाग्नाइचानया ।
समिदारूढमग्निञ्च लौकिकाग्नाइचानया ॥
समिधं तां समाधाय काले होमं समाचरेत् ।

* ८५ इदे दर्भपत्रमाहरेत् ।

तस्येतिकर्त्तव्यतामाह आचार्यः ।

हुत्वा सायम्प्रतिपदि चतुर्हेम चतुर्हेम ।
पृथग्गृहीत्वा मन्त्राभ्यां हिरण्यं पृथग्जुहुयात् ॥
द्वितीयायां तथा प्रातर्होमान्तेऽभ्यर्च्च पावकम् ।
पञ्चहोमं चरेदेवमग्निमानपि चापदि ॥ इति ।

व्याख्यायः । घोरापन्नाग्नौ पञ्चहोमं कुर्यात् । तदुक्तया शुक्ले कृष्णे वा प्रतिपदि स्थालीपाकं कृत्वा सायङ्काले पर्य्युक्षणादिसमित्-प्रक्षेपान्तं सङ्कल्पकृत्वा आहुतिप्रमाणं हौम्यद्रव्यं चतुर्दशकृत्वः पृथक् पात्रयोर्गृहीत्वा अग्नये स्वाहेति प्रथमगृहीतं सर्व्वं हुत्वा प्रजापतये स्वाहेति द्वितीयगृहीतं सर्व्वं हुत्वा पर्य्युक्षणाद्युपस्थानान्तमङ्गजातं सकृत् कुर्यात् । एवमेव द्वितीयायां प्रातरपि । अथामावास्यायां पौर्णमास्यां वा योनियागारादग्निमाहृत्य भूमिसंस्कारपूर्व्वकं कुण्डे निधाय घोरापदनुवृत्तौ पूर्व्ववत् स्थालीपाकं कृत्वा पूर्व्ववत् पञ्चहोमं कुर्यात् । एवं सततं पञ्चत्रयं पञ्चहोमे कृते सति पुनराधानं कार्य्यम् । पञ्चत्रये पुनराधेयमादधीत इत्यापस्तम्बस्मरणात् ।

मृत्यर्यसारे तु यावदापत्तावत्पञ्चहोम कार्य इत्युक्तम् ।

एवमापन्नतः पक्षे पक्षे चैवं समाचरेत् ।
यावदेतदुपक्षेत दीर्घकालं कथञ्चन ॥
यावज्जीवमविच्छि(सं)न्नान् पञ्चहो(सं)मान् समाचरेत् ।
आपदेवावधिस्तत्र न पञ्चगण्यावधिः ॥ इति ।

अथ सोमाग्रहणे दोषमाह शौनकः ।

उदये ऽस्तमये वापि दम्पती चेद्विनिर्गतौ।
आरूढौ वा धृतौ वाग्निर्लौकिकः स्यात्तदैव हि॥
प्रोषिते तु प्रिये पत्नी यदि ग्रामान्तरं व्रजेत्।
होमकाले यदि प्राप्ता न सा दोषेण युज्यते॥

कात्यायनस्तु।

अग्नावनुगते यत्र होमकालद्वयं व्रजेत्।
उभयोर्विप्रवासे वा लौकिकाग्निर्विधीयते॥

अत्र सभार्यस्य चिरकालप्रवासकरणमस्ति चेत्तदा अरण्योरात्मनि समिधि वा अग्निं समारोप्य गच्छेत्।

तथाच यौनकः।

अथ प्रयाणाद्यापत्सु समारोपणमुच्यते।
अरण्यात्मसमित्स्वेव गृह्यस्याग्नेर्यथाविधि॥
अग्नौ प्रज्वलिते गृह्ये प्रतपेदरणीद्वयम्।
अश्वत्थं समिधं वापि अयं ते योनिरित्यृचा*॥
या ते अग्ने यज्ञियेति पाषाणारोपयेत वा।
आपद्येयं समारोप्य ततः प्रत्यवरोहयेत्॥
अथारण्योः समारूढमरणीभ्यां मथेत् पुनः।
प्रत्यवरोहेत्यनयायाग्निमारूढं ततः शमन्॥
आत्मारूढाग्निमादध्याल्लौकिकाग्नाहवानया।
समिदारूढमग्निञ्च लौकिकाग्नाहवानया॥
समिधं तां समाधाय काले होमं समाचरेत्।

* ८५ पृष्ठे दर्शितमन्त्रवत्।